



# Srimath Valmiki Ramayanam

## Select Important sargams for Daily parayanam

Compiled by KPRV

# Srimad Valmiki Ramayanam -
# Most Celebrated and very auspicious Sargams
# (Vishesha Gattamgal):

## Contents — Page No.


0. Introductory Dhyana Slokas — i

1. Sri Rama Avatharam (The birth or descendance of Lord Sri Rama)- Bala Kandam (Canto 1) Sargam 18 — 1

2. Sri Sita Vivaham (Wedding of Mother Sita with Lord Sri Rama)- Bala Kandam (Canto 1) Sargam 73 — 7

3. Paduka Pattabhishekam (Coronation of Sri Rama's holy Sandals)- Ayoddhya Kandam (Canto 2) Sargam 115 — 11

4. Jatayu Moksham (Jatayu attaining liberation)- Aaranya Kandam (Canto 3) Sargam 68 — 14

5. Sugriva Pattabhishekam (Coronation of Sugriva)- Kishkindha Kandam (Canto 4) Sargam 26 — 18

6. Hanuman Crossing the Ocean (Sagara Langanam) – Sundara Kandam (Canto 5) Sargam 1 — 22

7. Anguliya Pradhanam (Hanuman giving Lord Sri Rama's Royal Ring to Sita) – Sundara Kandam (Canto 5) Sargam 65 — 40

8. Vibhishana Sharanaagathi (Vibhishana surrendering to Lord Sri Rama and taking refuge) - Yuddha Kandam (Canto 6) Sargam 19 — 43

9. Vibhishana Pattabhishekam in Sri Lanka (Coronation of Vibhishana in Sri Lanka) Yuddha Kandam (Canto 6) Sargam 115 — 47

10. Sri Rama Pattabhishekam (Coronation of Lord Sri Rama) – Yuddha Kandam(Canto 6) Sargam 131. — 50

11.Mangala slokas — 61


***************************

# ॥ ध्यान श्लोकाः ॥

रामानुजदयापात्रं ज्ञानवैराग्यभूषणम् ।
श्रीमद्वेङ्कटनाथार्यं वन्दे वेदान्तदेशिकम् ॥

लक्ष्मीनाथसमारम्भां नाथयामुनमध्यमाम् ।
अस्मदाचार्यपर्यन्तां वन्दे गुरुपरंपराम् ॥

यो नित्यमच्युतपदाम्बुजयुग्मरुक्म
व्यामोहतस्तदितराणि तृणाय मेने ।
अस्मद्गुरोर्भगवतोऽस्य दयैकसिन्धोः
रामानुजस्य चरणौ शरणं प्रपद्ये ॥

माता पिता युवतयस्तनया विभूतिः
सर्वं यदेव नियमेन मदन्वयानाम् ।
आद्यस्य नः कुलपतेर्वकुलाभिरामं
श्रीमत् तदङ्घ्रियुगलं प्रणमामि मूर्ध्ना ॥

भूतं सरश्च महदाह्वय भट्टनाथ
श्रीभक्तिसार कुलशेखर योगिवाहान् ।
भक्ताङ्घ्रिरेणु परकाल यतीन्द्र मिश्रान्
श्रीमत् पराङ्कुशमुनिं प्रणतोऽस्मि नित्यम् ॥

पितामहस्यापि पितामहाय प्राचेतसादेश फलप्रदाय ।
श्रीभाष्यकारोत्तम देशिकाय श्रीशैल पूर्णाय नमो नमस्तात् ॥

कूजन्तं रामरामेति मधुरं मधुराक्षरम् ।
आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम् ।
वाल्मीकेर्मुनिसिम्हस्य कवितावनचारिणः ।
शृण्वन् रामकथानादं को न याति पराङ्गतिम् ॥

यःपिबन् सततं रामचरितामृतसागरम् ।
अतृप्तस्तं मुनिं वन्दे प्राचेतसमकल्मषम् ॥

गोष्पदीकृत वाराशिं मशकीकृतराक्षसम् ।
रामायणमहामालारत्नं वन्देऽनिलात्मजम् ॥

अञ्जनानन्दनं वीरं जानकीशोकनाशनम् ।
कपीशमक्षहन्तारं वन्दे लङ्काभयङ्करम् ॥

मनोजवं मारुततुल्यवेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम् ।
वातात्मजं वानरयूथमुख्यं श्रीरामदूतं शिरसा नमामि ॥

उल्लङ्घ्य सिन्धोः सलिलं सलीलं यःशोकवह्निं जनकात्मजायाः ।
आदाय तेनैव ददाह लङ्कां नमामि तं प्राञ्जलिराञ्जनेयम् ॥

आञ्जनेयमतिपाटलाननं काञ्चनाद्रिकमनीयविग्रहम् ॥
पारिजाततरुमूलवासिनं भावयामि पवमाननन्दनम् ॥

यत्र यत्र रघुनाथकीर्तनं तत्र तत्र कृतमस्तकाञ्जलिम् ।
बाष्पवारिपरिपूर्णलोचनं मारुतिं नमत राक्षसान्तकम् ॥

वेदवेद्ये परे पुम्सि जाते दशरथात्मजे ।
वेदः प्राचेतसादासीत् साक्षाद्रामायणात्मना ॥

तदुपगतसमाससन्धियोगं सममधुरोपनतार्थवाक्यबद्धम् ।
रघुवरचरितं मुनिप्रणीतं दशशिरसश्च वधं निशामयध्वम् ॥

श्रीराघवं दशरथात्मजं अप्रमेयं
सीतापतिं रघुकुलान्वयरत्नदीपम् ।
आजानुबाहुं अरविन्ददलायताक्षं
रामं निशाचरविनाशकरं नमामि ॥

वैदेहीसहितं सुरद्रुमतले हैमे महामण्डपे
मध्ये पुष्पकमासने मणिमये वीरासने सुस्थितम् ।
अग्रे वाचयति प्रभञ्जनसुते तत्त्वं मुनिभ्य:परं
व्याख्यान्तं भरतादिभिः परिवृतं रामं भजे श्यामलम् ॥

॥ इति श्रीरामायणध्यानश्लोकाः ॥

# Srimad Valmiki Ramayanam - Most Celebrated and very auspicious Sargams (Vishesha Gattamgal):

## Bala Kanda Chapter [Sarga] 18

निर्वृत्ते तु क्रतौ तस्मिन् हयमेधे महात्मनः |
प्रति गृह्य अमरा भागान् प्रतिजग्मुः यथा आगतम् || १-१८-१

समाप्त दीक्षा नियमः पत्नी गण समन्वितः |
प्रविवेश पुरीम् राजा स भृत्य बल वाहनः || १-१८-२

यथा अर्हम् पूजिताः तेन राज्ञा च पृथिवीश्वराः |
मुदिताः प्रययुः देशान् प्रणंय मुनि पुंगवम् || १-१८-३

श्रीमताम् गच्छताम् तेषाम् स्वगृहाणि पुरात् ततः |
बलानि राज्ञाम् शुभ्राणि प्रहृष्टानि चकाशिरे || १-१८-४

गतेषु पृथिवीशेषु राजा दशरथः पुनः |
प्रविवेश पुरीम् श्रीमान् पुरस्कृत्य द्विजोत्तमान् || १-१८-५

शांतया प्रययौ सार्धम् ऋष्यशृङ्गः सुपूजितः |
अनुगंयमानो राज्ञा च सानुयात्रेण धीमता || १-१८-६

एवम् विसृज्य तान् सर्वान् राजा संपूर्ण मानसः |
उवास सुखितः तत्र पुत्र उत्पत्तिम् विचिंतयन् || १-१८-७

ततो यज्ञे समाप्ते तु ऋतूनाम् षट् समत्ययुः |
ततः च द्वादशे मासे चैत्रे नावमिके तिथौ || १-१८-८
नक्षत्रे अदिति दैवत्ये स्व उच्छ संस्थेषु पंचसु |
ग्रहेषु कर्कटे लग्ने वाक्पता इंदुना सह || १-१८-९
प्रोद्यमाने जगन्नाथम् सर्व लोक नमस्कृतम् |
कौसल्या अजनयत् रामम् सर्व लक्षण संयुतम् || १-१८-१०

विष्णोः अर्धम् महाभागम् पुत्रम् ऐक्ष्वाकु नंदनम् ।
लोहिताक्षम् महाबाहुम् रक्त ओष्टम् दुंदुभि स्वनम् ॥ १-१८-११

कौसल्या शुशुभे तेन पुत्रेण अमित तेजसा ।
यथा वरेण देवानाम् अदितिः वज्र पाणिना ॥ १-१८-१२

भरतो नाम कैकेय्याम् जज्ञे सत्य पराक्रमः ।
साक्षात् विष्णोः चतुर्थ भागः सर्वैः समुदितो गुणैः ॥ १-१८-१३

अथ लक्ष्मण शत्रुघ्नौ सुमित्रा अजनयत् सुतौ ।
वीरौ सर्व अस्त्र कुशलौ विष्णोः अर्ध समन्वितौ । १-१८-१४

पुष्ये जातः तु भरतो मीन लग्ने प्रसन्न धीः ।
सार्पे जातौ तु सौमित्री कुळीरे अभ्युदिते रवौ ॥ १-१८-१५

राज्ञः पुत्रा महात्मानः चत्वारो जज्ञिरे पृथक् ।
गुणवंतः अनुरूपाः च रुच्या प्रोष्ठ पदोपमाः ॥ १-१८-१६

जगुः कलम् च गंधर्वा ननृतुः च अप्सरो गणाः ।
देव दुंदुभयो नेदुः पुष्प वृष्टिः च खात् पतत् ॥ १-१८-१७
उत्सवः च महान् आसीत् अयोध्यायाम् जनाकुलः ।

रथ्याः च जन संबाधा नट नर्तक संकुलाः ॥ १-१८-१८
गायनैः च विराविण्यो वादनैः च तथ अपरैः ।
विरेजुर् विपुलाः तत्र सर्व रत्न समन्विताः ॥ १-१८-१९

प्रदेयांश्च ददौ राजा सूत मागध वंदिनाम् ।
ब्राह्मणेभ्यो ददौ वित्तम् गो धनानि सहस्रशः ॥ १-१८-२०

अतीत्य एकादश आहम् तु नाम कर्म तथा अकरोत् ।
ज्येष्ठम् रामम् महात्मानम् भरतम् कैकयी सुतम् ॥ १-१८-२१
सौमित्रिम् लक्ष्मणम् इति शत्रुघ्नम् अपरम् तथा ।
वसिष्ठः परम प्रीतो नामानि कुरुते तदा ॥ १-१८-२२

ब्राह्मणान् भोजयामास पौरान् जानपदान् अपि ।
उददद् ब्राह्मणानाम् च रत्नौघम् अमलम् बहु ॥ १-१८-२३
तेषाम् जन्म क्रिय आदीनि सर्व कर्माणि अकारयत् ।

तेषाम् केतुः इव ज्येष्ठो रामो रतिकरः पितुः ।१-१८-२४
बभूव भूयो भूतानाम् स्वयम् भूः इव सम्मतः ।

सर्वे वेद विदः शूराः सर्वे लोकहिते रताः ॥ १-१८-२५
सर्वे ज्ञानोपसंपन्नाः सर्वे समुदिता गुणैः ।

तेषाम् अपि महातेजा रामः सत्य पराक्रमः ॥ १-१८-२६
इष्टः सर्वस्य लोकस्य शशांक इव निर्मलः ।

गज स्कन्धे अश्व पृष्टे च रथ चर्यासु सम्मतः ॥ १-१८-२७
धनुर्वेदे च निरतः पितुः शुशृषणे रतः ।

बाल्यात् प्रभृति सुस्निग्धो लक्ष्मणो लक्ष्मि वर्धनः ॥ १-१८-२८
रामस्य लोकरामस्य भ्रातुः ज्येष्ठस्य नित्यशः ।

सर्व प्रिय करः तस्य रामस्य अपि शरीरतः ॥ १-१८-२९
लक्ष्मणो लक्ष्मि संपन्नो बहिः प्राण इव अपरः ।

न च तेन विना निद्राम् लभते पुरुषोत्तमः ॥ १-१८-३०
मृष्टम् अन्नम् उपानीतम् अश्नाति न हि तम् विना ।

यदा हि हयम् आरूढो मृगयाम् याति राघवः ॥ १-१८-३१
अथ एनम् पृष्ठतः अभ्येति स धनुः परिपालयन् ।

भरतस्य अपि शत्रुघ्नो लक्ष्मण अवरजो हि सः ॥ १-१८-३२
प्राणैः प्रियतरो नित्यम् तस्य च आसीत् तथा प्रियः ।

स चतुर्भिः महाभागैः पुत्रैः दशरथः प्रियैः ॥ १-१८-३३
बभूव परम प्रीतो देवैः इव पितामहः ।

ते यदा ज्ञान संपन्नाः सर्वैः समुदिता गुणैः || १-१८-३४
ह्रीमन्तः कीर्तिमन्तः च सर्वज्ञा दीर्घ दर्शिनः |
तेषाम् एवम् प्रभावाणाम् सर्वेषाम् दीप्त तेजसाम् || १-१८-३५
पिता दशरथो हृष्टो ब्रह्मा लोकाधिपो यथा |

ते च अपि मनुज व्याघ्रा वैदिक अध्ययने रताः || १-१८-३६
पितृ शुश्रूषण रता धनुर् वेदे च निष्ठिताः |

अथ राजा दशरथः तेषाम् दार क्रियाम् प्रति || १-१८-३७
चिंतयामास धर्मात्मा सह उपाध्यायः स बान्धवः |

तस्य चिंतयमानस्य मंत्रि मध्ये महात्मनः || १-१८-३८
अभ्यागच्छत् महातेजा विश्वामित्रो महामुनिः |

स राज्ञो दर्शन आकांक्षी द्वार अध्यक्षान् उवाच ह || १-१८-३९
शीघ्रम् आख्यात माम् प्राप्तम् कौशिकम् गाधिनः सुतम् |

तत् श्रुत्वा वचनम् तस्य राज्ञो वेश्म प्रदुद्रुवुः || १-१८-४०
संभ्रान्त मनसः सर्वे तेन वाक्येन चोदिताः |

ते गत्वा राज भवनम् विश्वामित्रम् ऋषिम् तदा || १-१८-४१
प्राप्तम् आवेदयामासुः नृपायैः इक्ष्वाकवे तदा |

तेषाम् तत् वचनम् श्रुत्वा सपुरोधाः समाहितः || १-१८-४२
प्रति उज्जगाम संहृष्टो ब्रह्माणम् इव वासवः |

तम् दृष्ट्वा ज्वलितम् दीप्त्या तपसम् संशित व्रतम् || १-१८-४३
प्रहृष्ट वदनो राजा ततः अर्घ्यम् उपहारयत् |

स राज्ञः प्रतिगृह्य अर्घ्यम् शास्त्र दृष्टेन कर्मणा || १-१८-४४
कुशलम् च अव्ययम् च एव पर्य पृच्छत् नराधिपम् |

पुरे कोशे जनपदे बान्धवेषु सुहृत्सु च || १-१८-४५
कुशलम् कौशिको राज्ञः पर्यपृच्छत् सुधार्मिकः |

अपि ते संनताः सर्वे सामंत रिपवो जिताः || १-१८-४६
दैवम् च मानुषम् च एव कर्म ते साधु अनुष्टितम् |

वसिष्ठम् च समागंय कुशलम् मुनिपुंगवः || १-१८-४७
ऋषीम् च तान् यथा न्यायम् महाभाग उवाच ह |

ते सर्वे हृष्ट मनसः तस्य राज्ञो निवेशनम् || १-१८-४८
विविशुः पूजिताः तेन निषेदुः च यथा अर्हतः |

अथ हृष्ट मना राजा विश्वामित्रम् महामुनिम् || १-१८-४९
उवाच परम उदारो हृष्टः तम् अभिपूजयन् |

यथा अमृतस्य संप्राप्तिः यथा वर्षम् अनूदके || १-१८-५०
यथा सदृश दारेषु पुत्र जन्म अप्रजस्य वै |
प्रणष्टस्य यथा लाभो यथा हर्षो महोदये || १-१८-५१
तथा एव आगमनम् मन्ये स्वागतम् ते महामुने |

कम् च ते परमम् कामम् करोमि किमु हर्षितः || १-१८-५२
पात्र भूतोऽसि मे ब्रह्मन् दिष्ट्या प्राप्तोऽसि मानद |
अद्य मे सफलम् जन्म जीवितम् च सु जीवितम् || १-१८-५३
यस्माद् विप्रेन्द्रम् अद्राक्षम् सुप्रभाता निशा मम |

पूर्वम् राजर्षि शब्देन तपसा द्योतित प्रभः || १-१८-५४
ब्रह्मर्षित्वम् अनुप्राप्तः पूज्योअसि बहुधा मया |

तत् अद्भुतम् अभूत् विप्र पवित्रम् परमम् मम || १-१८-५५
शुभ क्षेत्र गतः च अहम् तव संदर्शनात् प्रभो |

ब्रूहि यत् प्रार्थितम् तुभ्यम् कार्यम् आगमनम् प्रति || १-१८-५६
इच्छाम् अनुगृहीतो अहम् त्वदर्थम् परिवृद्धये |

कार्यस्य न विमर्शम् च गंतुम् अर्हसि सुव्रत || १-१८-५७
कर्ता च अहम् अशेषेण दैवतम् हि भवान् मम |

मम च अयम् अनुप्राप्तो महान् अभ्युदयो द्विज ।
तव आगमन जः कृत्स्नो धर्मः च अनुत्तमो द्विज ॥ १-१८-५८

इति हृदय सुखम् निशंय वाक्यम्
श्रुति सुखम् आत्मवता विनीतम् उक्तम् ।
प्रथित गुण यशा गुणैः विशिष्टः
परम ऋषिः परमम् जगाम हर्षम् ॥ १-१८-५९

इति वाल्मीकि रामायणे आदिकाव्ये
बाल काण्डे अष्टादशः सर्गः











# Bala Kanda - Sarga 73

**siitaa raama kalyaaNa ghaTTam**
**The Marriage of Sheetha with Rama**

यस्मिन् तु दिवसे राजा चक्रे गो दानम् उत्तमम् |
तस्मिन् तु दिवसे शूरो युधाजित् समुपेयिवान् || १-७३-१

पुत्रः केकय राजस्य साक्षात् भरत मातुलः |
दृष्ट्वा पृष्ट्वा च कुशलम् राजानम् इदम् अब्रवीत् || १-७३-२

केकय अधिपती राजा स्नेहात् कुशलम् अब्रवीत् |
येषाम् कुशलकामो असि तेषाम् संप्रति अनामयम् || १-७३-३

स्वस्रीयम् मम राजेन्द्र द्रष्टु कामो महीपतिः |
तत् अर्थम् उपयातो अहम् अयोध्याम् रघुनंदन || १-७३-४

श्रुत्वा तु अहम् अयोध्यायाम् विवाह अर्थम् तव आत्मजान् |
मिथिलाम् उपयातान् तु त्वया सह महीपते || १-७३-५
त्वरया अभुपयातो अहम् द्रष्टु कामः स्वसुः सुतम् |

अथ राजा दशरथः प्रिय अतिथिम् उपस्थितम् || १-७३-६
दृष्ट्वा परम सत्कारैः पूजार्हम् समपूजयत् |

ततः ताम् उषितो रात्रिम् सह पुत्रैः महात्मभिः || १-७३-७
प्रभाते पुनः उत्थाय कृत्वा कर्माणि तत्त्ववित् |
ऋषीन् तदा पुरस्कृत्य यज्ञ वाटम् उपागमत् || १-७३-८

युक्ते मुहूर्ते विजये सर्व आभरण भूषितैः |
भ्रातृभिः सहितो रामः कृत कौतुक मंगलः || १-७३-९
वसिष्ठम् पुरतः कृत्वा महर्षीन् अपरान् अपि |

वशिष्टःओ भगवान् एत्य वैदेहम् इदम् अब्रवीत् || १-७३-१०
राजा दशरथो राजन् कृत कौतुक मन्गालैः |
पुत्रैः नर वर श्रेष्ठ दातारम् अभिकांक्षते || १-७३-११

दातृ प्रतिग्रहीतृभ्याम् सर्व अर्थाः संभवन्ति हि ।
स्वधर्मम् प्रतिपद्यस्व कृत्वा वैवाह्यम् उत्तमम् ॥ १-७३-१२

इति उक्तः परम उदारो वसिष्ठेन महात्मना ।
प्रत्युवाच महातेजा वाक्यम् परम धर्मवित् ॥ १-७३-१३

कः स्थितः प्रतिहारो मे कस्य आज्ञा संप्रतीक्ष्यते ।
स्व गृहे को विचारो अस्ति यथा राज्यम् इदम् तव ॥ १-७३-१४

कृत कौतुक सर्वस्वा वेदि मूलम् उपागताः ।
मम कन्या मुनिश्रेष्ठ दीप्ता वह्नेः इव अर्चिषः ॥ १-७३-१५

सद्यो अहम् त्वत् प्रतीक्षो अस्मि वेद्याम् अस्याम् प्रतिषितः ।
अविघ्नम् कुरुताम् राजा किम् अर्थम् हि विलम्ब्यते ॥ १-७३-१६

तत् वाक्यम् जनकेन उक्तम् श्रुत्वा दशरथः तदा ।
प्रवेशयामास सुतान् सर्वान् ऋषि गणान् अपि ॥ १-७३-१७

ततो राजा विदेहानाम् वशिष्ठम् इदम् अब्रवीत् ।
कारयस्व ऋषे सर्वान् ऋषिभिः सह धार्मिक ॥ १-७३-१८
रामस्य लोक रामस्य क्रियाम् वैवाहिकीम् प्रभो ।

तथा इति उक्त्वा तु जनकम् वशिष्टःओ भगवान् ऋषिः ॥
विश्वामित्रम् पुरस्कृत्य शतानंदम् च धार्मिकम् ।
प्रपा मध्ये तु विधिवत् वेदीम् कृत्वा महातपाः ॥ १-७३-२०
अलम् चकार ताम् वेदीम् गन्ध पुष्पैः समंततः ।
सुवर्ण पालिकाभिः च चित्र कुम्भैः च स अंकुरैः ॥ १-७३-२१
अंकुर आढ्यैः शरावैः च धूप पात्रैः स धूपकैः ।
शंख पात्रैः श्रुवैः स्रुग्भिः पात्रैः अर्घ्यादि पूजितैः ॥ १-७३-२२
लाज पूर्णैः च पात्रीभिः रक्षितैः अपि संस्कृतैः ।
दर्भैः समैः समास्तीर्य विधिवत् मंत्र पुरस्कृतम् ॥ १-७३-२३
अग्निम् आधाय तम् वेद्याम् विधि मंत्र पूर्वकम् ।
जुहाव अग्नौ महातेजा वशिष्ठो मुनिपुंगव ॥ १-७३-२४

ततः सीताम् समानीय सर्व आभरण भुषिताम् ।
समक्षम् अग्नेः संस्थाप्य राघव अभिमुखे तदा ॥ १-७३-२५
अब्रवीत् जनको राजा कौसल्य आनंद वर्धनम् ।

इयम् सीता मम सुता सह धर्म चरी तव ॥ १-७३-२६
पतिव्रता महभागा छाय इव अनुगता सदा ॥ १-७३-२७
इति उक्त्वा प्राक्षिपत् राजा मंत्र पूतम् जलम् तदा ।

साधु साधु इति देवानाम् ऋषीणाम् वदताम् तदा ॥ १-७३-२८
देव दुंदुभि निर्घोषः पुष्प वर्षम् महान् अभूत् ।

एवम् दत्त्वा सुताम् सीताम् मंत्र उदक पुरस्कृताम् ॥ १-७३-२९
अब्रवीत् जनको राजा हर्षेण अभिपरिप्लुत ।

लक्ष्मण आगच्छ भद्रम् ते ऊर्मिलाम् उद्यताम् मया ॥ १-७३-३०
प्रतीच्छ पाणिम् गृह्णीष्व मा भूत् कालस्य पर्ययः ।

तम् एवम् उक्त्वा जनको भरतम् च अभ्यभाषत ॥ १-७३-३१
गृहाण पाणिम् माण्डव्याः पाणिना रघुनंदन ।

शत्रुघ्नम् च अपि धर्माअत्मा अब्रवीत् मिथिलेश्वरः ॥ १-७३-३२
श्रुतकीर्तेः महाबाहो पाणिम् गृह्णीष्व पाणिना ।

सर्वे भवन्तः सौंयाः च सर्वे सुचरित व्रताः ॥ १-७३-३३
जनकस्य वचः श्रुत्वा पाणीन् पाणिभिः अस्पृशन् ॥ १-७३-३४
चत्वारः ते चतसृणाम् वसिष्ठस्य मते स्थिताः ।

अग्निम् प्रदक्षिणम् कृत्वा वेदिम् राजानम् एव च ॥ १-७३-३५
ऋषीन् चैव महात्मानः सह भार्या रघु उद्वहाः ।
यथा उक्तेन तथा चक्रुः विवाहम् विधि पूर्वकम् ॥ १-७३-३६

पुष्पवृष्टिर्महत्यासीदन्तरिक्षात्सुभास्वरा ।
दिव्यदुन्दुभिनिर्घोषैर्गीतवादित्रनिःस्वनैः ॥ - यद्वा -
पुष्प वृष्टिः महति आसीत् अंतरिक्षात् सु भास्वरा ।

दिव्य दुन्दुभि निर्घोषैः गीत वादित्र निःस्वनैः || १-७३-३७
ननृतुः च अप्सरः संघा गन्धर्वाः च जगुः कलम् |
विवाहे रघु मुख्यानाम् तद् अद्भुतम् अदृश्यत || १-७३-३८

ईदृशे वर्तमाने तु तूर्य उद्घुष्ट निनादिते |
त्रिः अग्निम् ते परिक्रंय ऊहुः भार्या महौजसः || १-७३-३९

अथ उपकार्याम् जग्मुः ते स दारा रघुनंदनाः |
राजा अपि अनुययौ पश्यन् स ऋषि संघः स बान्धवः || ७३-४०

इति वाल्मीकि रामायणे आदि काव्ये
बाल काण्डे त्रि सप्ततितमः सर्गः





# II : Ayodhya Kanda - Sargam 115

तो निक्षिप्य मातृऋः स अयोध्यायाम् दृढ व्रतः |
भरतः शोक सम्तप्तो गुरून् इदम् अथ अब्रवीत् || २-११५-१

नन्दि ग्रामम् गमिष्यामि सर्वान् आमन्त्रये अद्य वः |
तत्र दुह्खम् इदम् सर्वम् सहिष्ये राघवम् विना || २-११५-२

गतः च हि दिवम् राजा वनस्थः च गुरुर् मम |
रामम् प्रतीक्षे राज्याय स हि राजा महा यशाः || २-११५-३

एतत् श्रुत्वा शुभम् वाक्यम् भरतस्य महात्मनः |
अब्रुवन् मन्त्रिणः सर्वे वसिष्ठः च पुरोहितः || २-११५-४

सदृशम् श्लाघनीयम् च यद् उक्तम् भरत त्वया |
वचनम् भ्रातृ वात्सल्याद् अनुरूपम् तव एव तत् || २-११५-५

नित्यम् ते बन्धु लुब्धस्य तिष्ठतो भ्रातृ सौहृदे |
आर्य मार्गम् प्रपन्नस्य न अनुमन्येत कः पुमान् || २-११५-६

मन्त्रिणाम् वचनम् श्रुत्वा यथा अभिलषितम् प्रियम् |
अब्रवीत् सारथिम् वाक्यम् रथो मे युज्यताम् इति || २-११५-७

प्रहृष्ट वदनः सर्वा मातृऋः समभिवाद्य सः |
आरुरोह रथम् श्रीमान् शत्रुघ्नेन समन्वितः || २-११५-८

आरुह्य तु रथम् शीघ्रम् शत्रुघ्न भरताउ उभौ |
ययतुः परम प्रीतौ वृतौ मन्त्रि पुरोहितैः || २-११५-९

अग्रतो पुरवः तत्र वसिष्ठ प्रमुखा द्विजाः |
प्रययुः प्रान् मुखाः सर्वे नन्दि ग्रामो यतो अभवत् || २-११५-१०

बलम् च तद् अनाहूतम् गज अश्व रथ सम्कुलम् |
प्रययौ भरते याते सर्वे च पुर वासिनः || २-११५-११

रथस्थः स तु धर्म आत्मा भरतो भ्रातृ वत्सलः |
नन्दि ग्रामम् ययौ तूर्णम् शिरस्य् आधाय पादुके || २-११५-१२

ततः तु भरतः क्षिप्रम् नन्दि ग्रामम् प्रविश्य सः |
अवतीर्य रथात् तूर्णम् गुरून् इदम् उवाच ह || २-११५-१३

एतद् राज्यम् मम भ्रात्रा दत्तम् सम्न्यासवत् स्वयम् |
योग क्षेम वहे च इमे पादुके हेम भूषिते || २-११५-१४

भरतः शिरसा कृत्वा सन्न्यासम् पादुके ततः |
अब्रवीद्दुःखसम्तप्तः सर्वं प्रकृतिमण्डलम् || २-११५-१५

चत्रम् धारयत क्षिप्रमार्यपादाविमौ मतौ |
अभ्याम् राज्ये स्थितो धर्मः पादुकाभ्याम् गुरोर्मम || २-११५-१६

भ्रात्रा हि मयि सम्न्यासो निक्षिप्तः सौहृदादयम् |
तमिमम् पालयिष्यामि राघवागमनम् प्रति २-११५-१७

क्षिप्रम् सम्योजयित्वा तु राघवस्य पुनः स्वयम् |
चरणौ तौ तु रामस्य द्रक्ष्यामि सहपादुकौ || २-११५-१८

ततो निक्षिप्तभारोऽहम् राघवेण समागतः |
निवेद्य गुरवे राज्यम् भजिष्ये गुरुवृत्तिताम् २-११५-१९

ताघवाय च सम्न्यासम् दत्त्वेमे वरपादुके |
राज्यम् चेदमयोध्याम् च धूतपापोभवामि च २-११५-२०

अभिषिक्ते तु काकुत्थ्से प्रहृष्टमुदिते जने |
प्रीतिर्मम यशश्चैव भवेद्राज्याच्चतुर्गुणम् || २-११५-२१

एवम् तु विलपन्धीनो भरतः स महायशाः |
नन्दिग्रामेऽकरोद्राज्यम् दुःखितो मन्त्रिभिस्सह || २-११५-२२

स वल्कलजटाधारी मुनिवेषधरः प्रभुः |
नन्दिग्रामेऽवसद्वीरः ससैन्यो भरतस्तदा २-११५-२३

रामागमनमाकाङ्क्षन् भरतो भ्रातृवत्सलः ।
भ्रातुर्वचनकारी च प्रतिज्ञापारगस्तदा ॥ २-११५-२४
पादुके त्वभिषिच्याथ नन्दिग्रामेऽवसत्तथा ।

स वालव्यजनम् चत्रम् धारयामास स स्वयम् ॥ २-११५-२५
भरतः शासनम् सर्वम् पादुकाभ्याम् निवेदयन् ।

ततस्तु भरतः श्रीमानभिषिच्यार्यपादुके ॥ २-११५-२६
तदधीनस्तदा राज्यम् कारयामास सर्वदा ।

तदा हि यत्कार्यमुपैति किंचि ।
दुपायनम् चोपहृतम् महार्हम् ।
स पादुकाभ्याम् प्रथमम् निवेद्य ।
चकार पश्चाद्भरतो यथावत् ॥ २-११५-२७

इत्यार्षे श्रीमद्रामायणे आदिकाव्ये अयोध्याकाण्डे
पंचदशोत्तरशततमः सर्गः





# III : Aranya Kanda - Sargam 68

रामः प्रेक्ष्य तु तम् गृध्रम् भुवि रौद्रेण पातितम् |
सौमित्रिम् मित्र संपन्नम् इदम् वचनम् अब्रवीत् || ३-६८-१

मम अयम् नूनम् अर्थेषु यतमानो विहंगमः |
राक्षसेन हतः संख्ये प्राणान् त्यजति मत् कृते || ३-६८-२

अति खिन्नः शरीरे अस्मिन् प्राणो लक्ष्मण विद्यते |
तथा स्वर विहीनो अयम् विक्लवम् समुदीक्षते || ३-६८-३

जटायो यदि शक्नोषि वाक्यम् व्याहरितुम् पुनः |
सीताम् आख्याहि भद्रम् ते वधम् आख्याहि च आत्मनः ||-४

किम् निमित्तो जहार आर्याम् रावणः तस्य किम् मया |
अपराधम् तु यम् दृष्ट्वा रावणेन हृता प्रिया || ३-६८-५

कथम् तत् चन्द्र संकाशम् मुखम् आसीत् मनोहरम् |
सीतया कानि च उक्तानि तस्मिन् काले द्विजोत्तम || ३-६८-६

कथम् वीर्यः कथम् रूपः किम् कर्मा स च राक्षसः |
क्व च अस्य भवनम् तात ब्रूहि मे परिपृच्छतः || ३-६८-७

तम् उद्वीक्ष्य सः धर्मात्मा विलपन्तम् अनाथवत् |
वाचा विक्लवया रामम् इदम् वचनम् अब्रवीत् || ३-६८-८

सा हृता राक्षसेन्द्रेण रावणेन दुरात्मना |
मायाम् आस्थाय विपुलाम् वात दुर्दिन संकुलाम् || ३-६८-९

परिक्लांतस्य मे तात पक्षौ छित्त्वा निशाचरः |
सीताम् आदाय वैदेहीम् प्रयातो दक्षिणा मुखः || ३-६८-१०

उपरुध्यन्ति मे प्राणा दृष्टिर् भ्रमति राघव |
पश्यामि वृक्षान् सौवर्णान् उशीर कृत मूर्धजान् || ३-६८-११

येन याति मुहूर्तेन सीताम् आदाय रावणः |
विप्रनष्टम् धनम् क्षिप्रम् तत् स्वामि प्रतिपद्यते || ३-६८-१२
विन्दो नाम मुहूर्तो असौ स च काकुत्स्थ न अबुधत् |

त्वत् प्रियाम् जानकीम् हृत्वा रावणो राक्षसेश्वर |
झषवत् बडिशम् गृह्य क्षिप्रम् एव विनश्यति || ३-६८-१३

न च त्वया व्यथा कार्या जनकस्य सुताम् प्रति |
वैदेह्या रंस्यसे क्षिप्रम् हत्वा तम् रणमूर्धनि || ३-६८-१४

असंमूढस्य गृध्रस्य रामम् प्रति अनुभाषतः |
आस्यात् सुस्राव रुधिरम् म्रियमाणस्य स अमिषम् || ३-६८-१५

पुत्रो विश्रवसः साक्षात् भ्राता वैश्रवणस्य च |
इति उक्त्वा दुर्लभान् प्राणान् मुमोच पतगेश्वरः || ३-६८-१६

ब्रूहि ब्रूहि इति रामस्य ब्रुवाणस्य कृतांजलेः |
त्यक्त्वा शरीरम् गृध्रस्य जग्मुः प्राणा विहायसम् || ३-६८-१७

स निक्षिप्य शिरो भूमौ प्रसार्य चरणौ तदा |
विक्षिप्य च शरीरम् स्वम् पपात धरणी तले || ३-६८-१८

तम् गृध्रम् प्रेक्ष्य ताम्र अक्षम् गत असुम् अचलोपमम् |
रामः सु बहुभिः दुह्खैः दीनः सौमित्रिम् अब्रवीत् || ३-६८-१९

बहूनि रक्षसाम् वासे वर्षाणि वसता सुखम् |
अनेन दण्डकारण्ये विशीर्णम् इह पक्षिणा || ३-६८-२०

अनेक वार्षिको यः तु चिर काल समुत्थितः |
सो अयम् अद्य हतः शेते कालो हि दुर्अतिक्रमः || ३-६८-२१

पश्य लक्ष्मण गृध्रो अयम् उपकारी हतः च मे |
सीताम् अभ्यवपन्नो हि रावणेन बलीयसा || ३-६८-२२

गृध्र राज्यम् परित्यज्य पितृ पैतामहम् महत् |
मम हेतोः अयम् प्राणान् मुमोच पतगेश्वरः || ३-६८-२३

सर्वत्र खलु दृश्यन्ते साधवो धर्म चारिणः |
शूराः शरण्याः सौमित्रे तिर्यक् योनि गतेषु अपि || ३-६८-२४

सीता हरणजं दुःखम् न मे सौम्य तथा गतम् |
यथा विनाशो गृध्रस्य मत् कृते च परंतप || ३-६८-२५

राजा दशरथः श्रीमान् यथा मम मया यशाः |
पूजनीयः च मान्यः च तथा अयम् पतगेश्वरः || ३-६८-२६

सौमित्रे हर काष्ठानि निर्मथिष्यामि पावकम् |
गृध्र राजम् दिधक्षामि मत् कृते निधनम् गतम् || ३-६८-२७

नाथम् पतग लोकस्य चिताम् आरोपयामि अहम् |
इमम् धक्ष्यामि सौमित्रे हतम् रौद्रेण रक्षसा || ३-६८-२८

या गतिः यज्ञ शीलानाम् आहित अग्नेः च या गतिः |
अ पर आवर्तिनाम् या च या च भूमि प्रदायिनाम् || ३-६८-२९
मया त्वम् समनुज्ञातो गच्छ लोकान् अनुत्तमान् |
गृध्र राज महा सत्त्व संस्कृतः च मया व्रज || ३-६८-३०

एवम् उक्त्वा चिताम् दीप्ताम् आरोप्य पतगेश्वरम् |
ददाह रामो धर्मात्मा स्व बन्धुम् इव दुःखितः || ३-६८-३१

रामो अथ सह सौमित्रिः वनम् यात्वा स वीर्यवान् |
स्थूलान् हत्वा महा रोहीन् अनु तस्तार तम् द्विजम् || ३-६८-३२

रोहि मांसानि च उद्धृत्य पेशी कृत्वा महायशाः |
शकुनाय ददौ रामो रम्ये हरित शाद्वले || ३-६८-३३

यत् तत् प्रेतस्य मर्त्यस्य कथयन्ति द्विजातयः |
तत् स्वर्ग गमनम् पित्र्यम् क्षिप्रम् रामो जजाप ह || ३-६८-३४

ततो गोदावरीम् गत्वा नदीम् नर वर आत्मजौ ।
उदकम् चक्रतुः तस्मै गृध्र राजाय तौ उभौ ॥ ३-६८-३५

शास्त्र दृष्टेन विधिना जले गृधाय राघवौ ।
स्नात्वा तौ गृध्र राजाय उदकम् चक्रुः तदा ॥ ३-६८-३६

स गृध्र राजः कृतवान् यशस्करम्
सु दुष्करम् कर्म रणे निपातितः ।
महर्षि कल्पेन च संस्कृतः तदा
जगाम पुण्याम् गतिम् आत्मनः शुभाम् ॥ ३-६८-३७

कृतोदकौ तौ अपि पक्षि सत्तमे
स्थिराम् च बुद्धिम् प्रणिधाय जग्मुतुः ।
प्रवेश्य सीता अधिगमने ततो मनो
वनम् सुरेन्द्रौ इव विष्णु वासवौ ॥ ३-६८-३८

इति वाल्मीकि रामायणे आदि काव्ये
अरण्य काण्डे अष्ट षष्टितमः सर्गः





# IV : Kishkindha Kanda - Sargam 26

ततः शोक अभिसंतप्तम् सुग्रीवम् क्लिन्न वासनम् |
शाखा मृग महामात्राः परिवार्य उपतस्थिरे || ४-२६-१

अभिगम्य महाबाहुम् रामम् अक्लिष्ट कारिणम् |
स्थिताः प्रांजलयः सर्वे पितामहम् इव ऋषयः || ४-२६-२

ततः कांचन शैल आभः तरुण अर्क निभ आननः |
अब्रवीत् प्रांजलिर् वाक्यम् हनुमान् मारुत आत्मजः || ४-२६-३

भवत् प्रसादात् काकुत्स्थ पितृ पैतामहम् महत् |
वानराणाम् सुदंष्ट्राणाम् संपन्न बलशालिनाम् || ४-२६-४
महात्मानाम् सुदुष्प्रापम् प्राप्तम् राज्यम् इदम् प्रभो |

भवता समनुज्ञातः प्रविश्य नगरम् शुभम् || ४-२६-५
संविधास्यति कार्याणि सर्वाणि ससुहृत् गणः|
स्नातो अयम् विविधैर् गन्धैर् औषधैः च यथा विधि || ४-२६-६

अर्चयिष्यति माल्यैः च रत्नैः च त्वाम् विशेषतः |
इमाम् गिरि गुहाम् रम्याम् अभिगन्तुम् त्वम् अर्हसि || ४-२६-७
कुरुष्व स्वामि संबन्धम् वानरान् संप्रहर्षयन् |

एवम् उक्तो हनुमता राघवः पर वीरहा || ४-२६-८
प्रत्युवाच हनूमन्तम् बुद्धिमान् वाक्य कोविदः |

चतुर्दश समाः सौम्य ग्रामम् वा यदि वा पुरम् || ४-२६-९
न प्रवेक्ष्यामि हनुमन् पितुर् निर्देश पालकः |

सुसमृद्धाम् गुहाम् दिव्याम् सुग्रीवो वानरर्षभः || ४-२६-१०
प्रविष्टो विधिवत् वीरः क्षिप्रम् राज्ये अभिषिच्यताम् |

एवम् उक्त्वा हनूमन्तम् रामः सुग्रीवम् अब्रवीत् || ४-२६-११
वृत्तज्ञो वृत्त संपन्नम् उदार बल विक्रमम् |

इमम् अपि अंगदम् वीरम् यौवराज्ये अभिषेचय || ४-२६-१२
ज्येष्ठस्य हि सुतो ज्येष्ठः सदृशो विक्रमेण च |
अंगदो अयम् अदीनात्मा यौवराज्यस्य भाजनम् || ४-२६-१३

पूर्वो अयम् वार्षिको मासः श्रावणः सलिल आगमः |
प्रवृत्ताः सौम्य चत्वारो मासा वार्षिक संज्ञिताः || ४-२६-१४

न अयम् उद्योग समयः प्रविश त्वम् पुरीम् शुभाम् |
अस्मिन् वत्स्यामि अहम् सौम्य पर्वते सह लक्ष्मणः || ४-२६-१५

इयम् गिरि गुहा रम्या विशाला युक्त मारुता |
प्रभूत सलिला सौम्य प्रभूत कमल उत्पला || ४-२६-१६

कार्तिके समनुप्राप्ते त्वम् रावण वधे यत |
एष नः समयः सौम्य प्रविश त्वम् स्वम् आलयम् || ४-२६-१७
अभिषिंचस्व राज्ये च सुहृदः संप्रहर्षय |

इति राम अभ्यनुज्ञातः सुग्रीवो वानरर्षभः || ४-२६-१८
प्रविवेश पुरीम् रम्याम् किष्किंधाम् वालि पालिताम् |

तम् वानर सहस्राणि प्रविष्टम् वानर ईश्वरम् || ४-२६-१९
अभिवार्य प्रहृष्टानि सर्वतः प्लवगेश्वरम् |

ततः प्रकृतयः सर्वा दृष्ट्वा हरि गण ईश्वरम् || ४-२६-२०
प्रणम्य मूर्ध्ना पतिता वसुधायाम् समाहिताः |

सुग्रीवः प्रकृतीः सर्वाः संभाष्य उत्थाप्य वीर्यवान् || ४-२६-२१
भ्रातुर् अंतः पुरम् सौम्यम् प्रविवेश महाबलः |

प्रविष्टम् भीम विक्रांतम् सुग्रीवम् वानरर्षभम् || ४-२६-२२
अभ्यषिंचंत सुहृदः सहस्राक्षम् इव अमराः |

तस्य पाण्डुरम् आजह्रुः छत्रम् हेम परिष्कृतम् || ४-२६-२३
शुक्ले च वाल व्यजने हेम दण्डे यशस्करे |
तथा सर्वाणि रत्नानि सर्व बीज औषधानि च || ४-२६-२४

स क्षीराणाम् च वृक्षाणाम् प्ररोहान् कुसुमानि च |
शुक्लानि चैव वस्त्राणि श्वेतम् चैव अनुलेपनम् || ४-२६-२५
सुगंधीनि च माल्यानि स्थलजानि अंबुजानि च |
चन्दनानि च दिव्यानि गन्धाम् च विविधान् बहून् || ४-२६-२६
अक्षतम् जात रूपम् च प्रियंगु मधु सर्पिषी |
दधि चर्म च वैयाघ्रम् परार्ध्ये च अपि उपानहौ || ४-२६-२७
समालंभनम् आदाय गोरोचनम् मनः शिलाम् |
आजग्मुः तत्र मुदिता वराः कन्याः च षोडश || ४-२६-२८

ततः ते वानर श्रेष्ठम् अभिषेक्तुम् यथा विधि |
रत्नैर् वस्त्रैः च भक्ष्यैः च तोषयित्वा द्विजर्षभान् || ४-२६-२९

ततः कुश परिस्तीर्णम् समिद्धम् जात वेदसम् |
मंत्र पूतेन हविषा हुत्वा मंत्रविदो जनाः || ४-२६-३०

ततो हेम प्रतिष्ठाने वर आस्तरण संवृते |
प्रासाद शिखरे रम्ये चित्र माल्य उपशोभिते || ४-२६-३१
प्राङ्मुखम् विधिवत् मंत्रैः स्थापयित्वा वर आसने |
नदी नदेभ्यः संहृत्य तीर्थेभ्यः च समंततः || ४-२६-३२
आहृत्य च समुद्रेभ्यः सर्वेभ्यो वानरर्षभाः |
अपः कनक कुंभेषु निधाय विमलम् जलम् || ४-२६-३३
शुभैः वृषभ शृन्गैः च कलशैः च एव कांचनैः |
शास्त्र दृष्टेन विधिना महर्षि विहितेन च || ४-२६-३४
गजो गवाक्षो गवयः शरभो गंधमादनः |
मैन्दः च द्विविदः चैव हनूमान् जांबवान् तथा || ४-२६-३५
अभ्यषिंचंत सुग्रीवम् प्रसन्नेन सुगंधिना |
सलिलेन सहस्राक्षम् वसवो वासवम् यथा || ४-२६-३६

अभिषिक्ते तु सुग्रीवे सर्वे वानर पुंगवाः |
प्रचुक्रुशुर् महात्मानो हृष्टाः शत सहस्रशः || ४-२६-३७

रामस्य तु वचः कुर्वन् सुग्रीवो हरि पुंगवः ।
अंगदम् संपरिष्वज्य यौवराज्ये अभिषेचयत् ॥ ४-२६-३८

अंगदे च अभिषिक्ते तु सानुक्रोशाः प्लवंगमाः ।
साधु साधु इति सुग्रीवम् महात्मानो हि अपूजयन् ॥ ४-२६-३९

रामम् च एव महात्मानम् लक्ष्मणम् च पुनः पुनः ।
प्रीताः च तुष्टुवुः सर्वे तादृशे तत्र वर्तिनि ॥ ४-२६-४०

हृष्ट पुष्ट जन आकीर्णा पताका ध्वज शोभिता ।
बभूव नगरी रम्या क्षिकिंधा गिरि गह्वरे ॥ ४-२६-४१

निवेद्य रामाय तदा महात्मने
महा अभिषेकम् कपि वाहनी पतिः ।
रुमाम् च भार्याम् उपलभ्य वीर्यवान्
अवाप राज्यम् त्रिदश अधिपो यथा ॥ ४-२६-४२

इति वाल्मीकि रामायणे आदि काव्ये
किष्किन्ध काण्डे षड् विंशः सर्गः





# V : Sundara Kandam - Sarga 1

ततो रावणनीतायाः सीतायाः शत्रुकर्शनः ।
इयेष पदमन्वेष्टुं चारणाचरिते पथि ।।५-१-१

दुष्करं निष्प्रतिद्वन्द्वं चिकीर्षन् कर्म वानरः ।
समुदग्रशिरोग्रीवो गवांपतिरिवाबभौ ।। ५-१-२

अथ वैडूर्यवर्णेषु शाद्वलेषु महाबलः ।
धीरः सलिलकल्पेषु विच्चार यथासुखम् ।।५-१-३

मृगांश्च सुबाहुन्निघ्नन् प्रवृद्ध इव केसरी।। ५-१-४

नीललोहितमाञ्जिष्ठपत्रवर्णैः सितासितैः ।
स्वभावविहितैश्चित्रैर्धातुभिः समलंकृतम् ।।५-१-५
कामरूपिभिराविष्टमभीक्ष्णं सपरिच्छिदैः ।
यक्षकिन्नरगन्धर्वैर्देवकल्पैश्च पन्नगैः ।।५-१-६
स तस्य गिरिवर्यस्य तले नागवरायुते ।
तिष्ठन् कपिवरस्तत्र ह्रदे नाग इवाबभौ ।।५-१-७

स सूर्याय महेन्द्राय पवनाय स्वयंभुवे ।
भूतेभ्यश्चाञ्जलिं कृत्वा चकार गमने मतिम् ।। ५-१-८

अञ्जलिं प्राङ्मुखः कृत्वा पवनायात्मयोओनयो ।
ततो हि ववृधे गन्तुं दक्षिणो दक्षिणां दिशम् ।। ५-१-९

प्लवङ्गप्रवरैर्दृष्टः प्लवने कृतनिश्चयः ।
ववृधे रामवृद्ध्यर्थम् समुद्र इव पर्वसु ।। ५-१-१०

निष्प्रमाणशरीरः सन् लिलङ्घयिषुरर्णवम् ।
बाहुभ्यां पीडयामास चरणाभ्यां च पर्वतम् ।। ५-१-११

स चचालाचलश्चापि मुहूर्तं कपिपीडितः ।
तरूणां पुष्पिताग्राणां सर्वं पुष्पमशातयत् ।। ५-१-१२

तेन पादपमुक्तेन पुष्पौघेन सुगन्धिना ।
सर्वतः संवृतः शैलो बभौ पुष्पमयो यथा ॥५-१-१३

तेन चोत्तमवीर्येण पीड्यमानः स पर्वतः ।
सलिलं संप्रसुस्राव मदं मत्त इव द्विपः ॥५-१-१४

पीड्यमानस्तु बलिना महेन्द्रस्तेन पर्वतः ।
रीतीर्निर्वर्तयामास काञ्चनाञ्जनराजतीः ॥५-१-१५

मुमोच च शिलाः शैलो विशालाः समनःशिलाः ।
मध्यमेनार्चिषा जुष्टो धूमराजीरिवानलः ॥५-१-१६

गिरिणा पीड्यमानेन पीड्यमानानि सर्वशः ।
गुहाविष्टानि भूतानि विनेदुर्विकृतैः स्वरैः ॥५-१-१७

स महासत्त्वसंनादः शैलपीडानिमित्तजः ।
पृथिवीं पूरयामास दिशश्चोपवनानि च ॥५-१-१८

शिरोभिः पृथुभिः सर्पा व्यक्तस्वस्तिकलक्षणैः ।
वमन्तः पावकं घोरं ददंशुर्दशनैः शिलाः ॥५-१-१९

तास्तदा सविषैर्दष्टाः कुपितैस्तैर्महाशिलाः।
जज्वलुः पावकोद्दीप्ता बिभिदुश्च सहस्रधा ॥५-१-२०

यानि चौषधजालानि तस्मिन् जातानि पर्वते ।
विषघ्नान्यपि नागानां न शेकुः शमितुं विषम्॥ ५-१-२१

भिद्यतेऽयं गिरिर्भूतैरिति मत्त्वा तपस्विनः ।
त्रस्ता विद्याधरास्तस्मादुत्पेतुः स्त्रीगणैः सह॥ ५-१-२२
पानभूमिगतं हित्वा हैममासवभाजनम् ।
पात्रणि च महार्हाणि करकांश्च हिरण्मयान् ॥५-१-२३
लेह्यानुच्चावचान् भक्ष्यान् मांसानि विविधानि च ।
आर्षभाणि च चर्माणि खड्गांश्च कनकत्सरून् ॥ ५-१-२४

कृतकण्ठगुणाः क्षीबा क्र्तमाल्यानुलेपनाः |
क्र्तक्षाः पुष्कराक्षाश्च गगनं प्रतिपेदिरे ||५-१-२५

हारनूपुरकेयूरपारिहार्यधराः स्त्रियः |
विस्मिताः सस्मितास्तस्थुराकाशे रमणैः सह ||५-१-२६

दर्शयन्तो महाविद्यां विद्याधरमहर्षयः |
सहितास्तस्थुराकाशे वीक्षाञ्चक्रुश्च पर्वतम्|| ५-१-२७

शुश्रुवुश्चतदा शब्दमृषीणां भावितात्मनाम्|
चारणानां च सिद्धानां स्थितानांविमलेऽम्बरे|| ५-१-२८

एष पर्वतसंकाशो हनूमान् मारुतात्मजः |
रामार्थं वानरार्थं च चिकीर्षन् कर्मदुष्करम् |
समुद्रस्य परं पारं दुष्प्रापं प्राप्तुमिच्छति|| ५-१-३०

इति विद्याधराः श्रुत्वा वचस्तेषां महात्मनाम् |
तमप्रमेयं दद्दशुः पर्वते वानरर्षभम् ||५-१-३१

दुधुवे च स रोमाणि चकम्पे चाचलोपमः |
ननाद सुमहानादं सुमहानिव तोयदः || ५-१-३२

आनुपूर्व्येण वृत्तं च लाङ्गूलं लोमभिश्चितम् |
उत्पतिष्यन् विचिक्षेप पक्षिराज इवोरगम् ||५-१-३३

तस्य लाङ्गूलमाविद्धमात्तवेगस्य पृष्ठतः |
दद्दशे गरुडेनेव ह्रियमाणो महोरगः || ५-१-३४

बाहू संस्तंभयामास महापरिघसंनिभौ |
ससाद च कपिः क्ट्यां चरणौ संचुकोच च ||५-१-३५

संहृत्य च भुजौ श्रीमांस्तथैव च शिरोधराम् |
मार्गमालोकयन्दूराद्दूर्ध्वं प्रणिहितेक्षणः |
रुरोध हृदये प्राणानाकाशमवलोकयन् || ५-१-३७

पद्भ्यां दृढमवस्थानं कृत्वा स कपिकुञ्जरः |
निकुञ्च्य कर्णौ हनुमानुत्पतिष्यन् महाबलः |
वानरान् वानरश्रेष्ठ इदं वचनमब्रवीत् || ५-१-३८

यथा राघवनिर्मुक्तः शरः श्वसनविक्रमः |
गच्छेत्तद्वद्गमिष्यामि लङ्कां रावणपालिताम् || ५-१-३९
न हि द्रक्ष्यामि यदि तां लङ्कायां जनकात्मजाम् |
अनेनैव हि वेगेन गमिष्यामि सुरालयम् || ५-१-४०
यदि वा त्रिदिवे सीतां न द्रक्ष्याम्यकृतश्रमः |
बद्ध्वा राक्षसराजानमानयिष्यामि रावणम् || ५-१-४१
सर्वथा कृतकार्योऽहमेष्यामि सह सीतया |
आनयिष्यामि वा लङ्कां समुत्पाट्य सरावणाम् || ५-१-४२

एवमुक्त्वा तु हनुमान्वानरान्वानरोत्तमः || ५-१-४३
उत्पपाताथ वेगेन वेगवानविचारयन् |
सुपर्णमिव चात्मानं मेने स कपिकुञ्जरः || ५-१-४४

समुत्पतति तस्मिंस्तु वेगात्ते नगरोहिणः |
संहृत्य विटपान् सर्वान् समुत्पेतुः समन्ततः || ५-१-४५

स मत्तकोयष्टिभकान् पादपान् पुष्पशालिनः |
उद्वहन्नूरुवेगेन जगाम विमलेऽम्बरे || ५-१-४६

ऊरुवेगोत्थिता वृक्षा मुहूर्तं कपिमन्वयुः |
प्रस्थितं दीर्घमध्वानं स्वबन्धमिव बान्धवाः || ५-१-४७

तमूरुवेगोन्मथिताःसालाश्चान्ये नगोत्तमाः|
अनुजग्मुर्हनूमन्तं सैन्या इव महीपतिम् || ५-१-४८

सुपुष्पिताग्रैर्बहुभिः पादपैरन्वितः कपिः |
हनुमान् पर्वताकारो बभूवाद्भुतदर्शनः || ५-१-४९
सारवन्तोऽथ ये वृक्षा न्यमज्जन् लवणाम्भसि |
भयादिव महेन्द्रस्य पर्वता वरुणालये || ५-१-५०

स नानाकुसुमैः कीर्णः कपिः साङ्कुरकोरकैः |
शुशुभे मेघसंकाशः खद्योतैरिव पर्वतः || ५-१-५१

विमुक्तास्तस्य वेगेन मुक्त्वा पुष्पाणि ते द्रुमाः |
अवशीर्यन्त सलिले निवृत्ताः सुहृदो यथा ||५-१-५२

लघुत्वेनोपपन्नं तद्विचित्रं सागरेऽपतत् |
द्रुमाणां विविधं पुष्पं कपिवायुसमीरितम् || ५-१-५३
ताराचितमिवाकाशं प्रबभौ च महार्णवः |

पुष्पौघेनानुबद्धेन नानावर्णेन वानरः |
बभौ मेघ इवाकाशे विद्‍युद्गणविभूषितः || ५-१-५४

तस्य वेगसमाधूतैः पुष्पैस्तोयमदृश्यत ||५-१-५५
ताराभिरभिरामाभिरुदिताभिरिवाम्बरम् |

तस्याम्बरगतौ बाहू ददृशाते प्रसारितौ || ५-१-५६
पर्वताग्राद्विनिष्क्रान्तौ पञ्चास्याविव पन्नगौ |

पिबन्निव बभौ चापि सोओर्मिमालं महार्णवम् || ५-१-५७
पिपासुरिव चाकाशं ददृशे स महाकपिः |

तस्य विद्‍युत्प्रभाकारे वायुमार्गानुसारिणः ||५-१-५८
नयने विप्रकाशेते पर्वतस्थाविवानलौ |

पिङ्गे पिङ्गाक्षमुख्यस्य बृहती परिमण्डले || ५-१-५९
चक्षुषी संप्रकाशेते चन्द्रसूर्याविवोदितौ |

मुखं नासिकया तस्य ताम्रया ताम्रमाबभौ || ५-१-६०
सन्ध्यया समभिस्पृष्टं यथा तत्सूर्यमण्डलम् |

लाङ्गूलं च समाविद्धं प्लवमानस्य शोभते ||५-१-६१
अम्बरे वायुपुत्रस्य शक्रध्वज इवोच्छ्रितः |
लाङ्गूलचक्रेण महान् शुक्लदंष्ट्रोऽनिलात्मजः || ५-१-६२
व्यरोचत महाप्राज्ञः परिवेषीव भास्करः |

स्फिग्देशेनाभिताम्रेण रराज स महाकपिः || ५-१-६३
महता दारितेनेव गिरिर्गैरिकधातुना |

तस्य वानरसिंहस्य प्लवमानस्य सागरम् || ५-१-६४
कक्षान्तरगतो वायुर्जीमूत इव गर्जति |

खे यथा निपतन्त्युल्का ह्युत्तरान्ताद्विनिःसृता ||५-१-६५
दृश्यते सानुबन्धा च तथा स कपिकुञ्जरः |

पतत्पतङ्गसंकाशो व्यायतः शुशुभे कपिः || ५-१-६६
प्रवृद्ध इव मातङ्गः कक्ष्यया बध्यमानया |

उपरिष्टाच्छरीरेण छायया चावगाढया |
सागरे मारुताविष्टा नौरिवासीत्तदा कपिः || ५-१-६७

यं यं देशं समुद्रस्य जगाम स महाकपिः |
स स तस्योरुवेगेन सोन्माद इव लक्ष्यते | ५-१-६८

सागरस्योओर्मिजालानामुरसा शैलवर्ष्मणाम् |
अभिघ्नंस्तु महावेगः पुप्लुवे स महाकपिः |५-१-६९

कपिवातश्च बलवान् मेघवातश्च निःसृतः |
सागरं भीमनिर्घोषं कम्पयामासतुर्भृशम् || ५-१-७०

विकर्षन्नूर्मिजालानि बृहन्ति लवणाम्भसि |
पुप्लुवे कपिशार्दूलो विकिरन्निव रोदसी || ५-१-७१

मेरुमन्दरसंकाशानुद्धतान् स महार्णवे |
अत्यक्रामन्महावेगस्तरङ्गान् गणयन्निव || ५-१-७२

तस्य वेगसमुद्धूतं जलं सजलदं तदा |
अम्बरस्थं विबभ्राज शारदाभ्रमिवाततम् || ५-१-७३

तिमिनक्रझषाः कूर्मा दृश्यन्ते विवृतास्तदा |
वस्त्रापकर्षणेनेव शरीराणि शरीरिणाम् || ५-१-७४

प्लवमानं समीक्ष्यथ भुजङ्गाः सागरालयाः |
व्योम्नि तं कपिशार्दूलं सुपर्ण इति मेनिरे || ५-१-७५

दशयोजनविस्तीर्णा त्रिंशद्योजनमायता |
छाया वानरसिंहस्य जले चारुतराभवत् || ५-१-७६

श्वेताभ्रघनराजीव वायुपुत्रानुगामिनी |
तस्य सा शुशुभे छाया वितता लवणाम्भसि || ५-१-७७

शुशुभे स महातेजा महाकायो महाकपिः |
वायुमार्गे निरालम्बे पक्षवानिव पर्वतः || ५-१-७८

येनासौ याति बलवान् वेगेन कपिकुञ्जरः |
तेन मार्गेण सहसा द्रोणीकृत इवार्णवः || ५-१-७९

आपाते पक्षिसंघानां पक्षिराज इव व्रजन् |
हनुमान् मेघजालानि प्रकर्षन् मारुतो यथा || ५-१-८०

पाण्डुरारुणवर्णानि नीलमाञ्जिष्ठकानि च |
कपिनाकृष्यमाणानि महाभ्राणि चकाशिरे || ५-१-८१

प्रविशन्नभ्रजालानिनिष्पतंश्च पुनः पुनः |
प्रच्छन्नश्च प्रकाशश्च चन्द्रमा इव लक्ष्यते || ५-१-८२

प्लवमानं तु तं दृष्ट्वा प्लवङ्गं त्वरितं तदा |
ववर्षुः पुष्पवर्षाणि देवगन्धर्वदानवाः || ५-१-८३

तताप न हि तं सूर्यः प्लवन्तं वानरोत्तमम् |
सिषेवे च तदा वायू रामकार्यार्थसिद्धये || ५-१-८४

ऋषयस्तुष्टुवुश्चैव प्लवमानं विहायसा |
जगुश्च देवगन्धर्वाः प्रशंसन्तो महौजसम् || ५-१-८५

नागाश्च तुष्टुवुर्यक्षा रक्षांसि विबुधाः खगाः || ५-१-८६
प्रेक्ष्य सर्वे कपिवरं सहसा विगतक्लमम् |

तस्मिन् प्लवगशार्दूले प्लवमाने हनूमति || ५-१-८७
इक्ष्वाकुकुलमानार्थी चिन्तयामास सागरः |

साहाय्यं वानरेन्द्रस्य यदि नाहं हनूमतः || ५-१-८८
करिष्यामि भविष्यामि सर्ववाच्यो विवक्षताम् |

अहमिक्ष्वाकुनाथेन सगरेण विवर्धतः || ५-१-८९
इक्ष्वाकुसचिचश्चायं नावसीदितुमर्हति |

तथा मया विधातव्यं विश्रमेत यथा कपिः || ५-१-९०
शेषं च मयि विश्रान्तः सुखेनातिपतिष्यति |

इति कृत्वा मतिं साध्वीं समुद्रश्चन्नमम्भसि || ५-१-९१
हिरण्यनाभं मैनाकमुवाच गिरिसत्तमम् |

त्वमिहासुरसंघानां पाताळतलवासिनां || ५-१-९२
देवराज्ञा गिरिश्रेष्ठ परिघः संनिवेशितः |

त्वमेषां जातवीर्याणां पुनरेवोत्पतिष्यताम् || ५-१-९३
पाताळस्याप्रमेयस्य द्वारमावृत्य तिष्ठसि |

तिर्यगूर्ध्वमधश्चैव शक्तिस्ते शैल वर्धितुम् || ५-१-९४
तस्मात्संचोदयामि त्वामुत्तिष्ठ गिरिसत्तम |

न एष कपिशार्दूलस्त्वमुपर्येति वीर्यवान् || ५-१-९५
हनूमान्रामकार्यार्थं भीमकर्मा खमाप्लुतः |

अस्य साह्यं मया कार्यमिक्ष्वाकुकुलवर्तिनः || ५-१-९६
मम हीक्ष्वाकवः पूज्याः परं पूज्यतमास्तव |

कुरु साचिव्यमस्माकं न नः कार्यमतिक्रमेत् || ५-१-९७
कर्तव्यमकृतं कार्यं सतां मन्युमुदीरयेत् |

सलिलादूर्ध्वमुत्तिष्ठ तिष्ठत्वेष कपिस्त्वयि || ५-१-९८
अस्माकमतिथिश्चैव पूज्यश्च प्लवतां वरः |

चामीकरमहानाभ देवगन्धर्व सेवित ||५-१-९९
हनुमांस्त्वयि विश्रान्तस्ततः शेषं गमिष्यति |

काकुत्स्थस्यानृशंस्यं च मैथिल्याश्च विवासनम् || ५-१-१००
श्रमं च प्लवगेन्द्रस्य समीक्ष्योत्थातुमर्हसि |

हिरण्य नाभो मैनाको निशम्य लवणाम्भसः || ५-१-१०१
उत्पपात जलात्तूर्णं महाद्रुमलतायुतः |

स सागरजलं भित्त्वा बभूवाभ्युत्थितस्तदा || ५-१-१०२
स महात्मा मुहूर्तेन सर्वतः सलिलावृतः || ५-१-१०३
द्रशयामास शृङ्गाणि सागरेण नियोजितः |
शातकुम्भमयैः शृङ्गैः सकिन्नरमहोरगैः || ५-१-१०४
आदित्योदयसंकाशैरालिखद्भिरिवाम्बरम् |

तप्तजाम्बूनदैः शृङ्गाः पर्वतस्य समुत्थितैः || ५-१-१०५
आकाशं शस्त्रसंकाशमभवत्काञ्चनप्रभम् |

जातरूपमयैः शृङ्गैर्भ्राजमानैः स्वयंप्रभैः || ५-१-१०६
आदित्यशतसंकाशः सोऽभवद्गिरिसत्तमः |

तमुत्थितमसंगेन हनुमानग्रतः स्थितम् || ५-१-१०७
मध्ये लवणतोयस्य विघ्नोऽयमिति निश्चितः |

स तमुच्छ्रित मत्यर्थं महावेगो महाकपिः || ५-१-१०८
उरसा पातयामास जीमूतमिव मारुतः |

स तथा पातितस्तेन कपिना पर्वतोत्तमः || ५-१-१०९
बुद्ध्वा तस्य कपेर्वेगं जहर्ष च ननन्द च |

तमाकाशगतं वीरमाकाशे समुपस्थितः || ५-१-११०
प्रीतो हृष्टमना वाक्यमब्रवीत्पर्वतः कपिम् |
मानुषं धारयन् रूपमात्मनः शिखरे स्थितः || ५-१-१११

दुष्करं कृतावन्कर्म त्वमिदं वानरोत्तम ।
निपत्य मम शृङ्गेषु विश्रमस्व यथासुखम् ।। ५-१-११२

राघवस्य कुले जातैरुदधिः परिवर्धितः ।
स त्वां रामहिते युक्तं प्रत्यर्चयति सागरः ।। ५-१-११३

कृते च प्रतिकर्तव्यमेष धर्मः सनातनः ।
सोऽयं तत्प्रतिकारार्थी त्वत्तः संमानमर्हति ।। ५-१-११४

त्वन्निमित्तमनेनाहं बहुमानात्प्रचोदितः ।
योजनानां शतं चापि कपिरेष समाप्लुतः ।।५-१-११५
तव सानुषु विश्रान्तः शेषं प्रक्रमतामिति ।
तिष्ठ त्वं हरिशार्दूल मयि विश्रम्य गम्यताम् ।। ५-१-११६

तदिदं गन्धवत्स्वादु कन्दमूलफलं बहु ।
तदास्वाद्य हरिश्रेष्ठ विश्रान्तोऽनु गमिष्यसि ।। ५-१-११७

अस्माकमपि सम्बन्धः कपिमुख्य त्वयास्ति वै ।
प्रख्यातस्त्रिषु लोकेषु महागुणपरिग्रहः ।। ५-१-११८

वेगवन्तः प्लवन्तो ये प्लवगा मारुतात्मज ।
तेषां मुख्यतमं मन्ये त्वामहं कपिकुञ्जर ।। ५-१-११९

अतिथिः किलपूजार्हः प्राकृतोऽपि विजानता ।
धर्मं जिज्ञासमानेन किं पुनस्त्वादृशो महान् ।। ५-१-१२०

त्वं हि देववरिष्ठस्य मारुतस्य महात्मनः ।
पुत्रस्तस्यैव वेगेन सदृशः कपिकुञ्जर ।। ५-१-१२१

पूजिते त्वयि धर्मज्ञ पूजां प्राप्नोति मारुतः ।
तस्मात्त्वं पूजनीयो मे शृणु चाप्यत्र कारणम् ।। ५-१-१२२

पूर्वं कृतयुगे तात पर्वताः पक्षिणोऽभवन् ।
ते हि जग्मुर्दिशः सर्वा गरुडानिलवेगिनः ।। ५-१-१२३

ततस्तेषु प्रयातेषु देवसंघः सहर्षिभिः |
भूतानि च भयं जग्मुस्तेषां पतनशङ्कया|| ५-१-१२४

ततः क्रुद्धः सहस्राअक्षः पर्वतानां शतक्रतुः |
पक्षान् चिच्छेद वज्रेण तत्र तत्र सहस्रशः ||५-१-१२५

स मामुपागतः क्रुद्धो वज्रमुद्यम्य देवराट् |
ततोऽहं सहसा क्षिप्तः स्वसनेन महात्मना || ५-१-१२६

अस्मिन्लवणतोये च प्रक्षिप्तः प्लवगोत्तम |
गुप्तपक्षसमग्रश्च तव पित्राभिरक्षितः || ५-१-१२७

ततोऽहं मानयामि त्वां मान्यो हि मम मारुतः |
त्वया मे ह्येष संबन्धः कपिमुख्य महागुणः || ५-१-१२८

अस्मिन्नेवंगते कार्ये सागरस्य ममैव च |
प्रीतिं प्रीतमनाः कर्तुं त्वमर्हसि महाकपे || ५-१-१२९

श्रमं मोक्षय पूजां च गृहाण कपिसत्तम |
प्रीतिं च बहुमन्यस्व प्रीतोऽस्मि तव दर्शनात् || ५-१-१३०

एवमुक्तः कपिश्रेष्ठस्तं नगोत्तममब्रवीत् |
प्रीतोऽस्मि कृतमातिथ्यं मन्युरेषोऽपनीयताम् || १५-१-१३१

त्वरते कार्यकालो मे अहश्चाप्यतिवर्तते |
प्रतिज्ञा च मया दत्ता न स्थातव्यमिहान्तरे || ५-१-१३२

इत्युक्त्वा पाणिना शैलमालभ्य हरिपुङ्गवः |
जगामाकाशमाविश्य वीर्यवान् प्रहसन्निव || ५-१-१३३

स पर्वतसमुद्राभ्यां बहुमानादवेक्षितः |
पूजितश्चोपपन्नाभिराशीर्भिरनिलात्मजः || ५-१-१३४

अथोर्ध्वं दूरमुत्प्लुत्य हित्वा शैलमहार्णवौ |
पितुः पन्थानमास्थाय जगाम विमलेऽम्बरे || १-५-१३५

भूयश्चोर्ध्वं गतिं प्राप्य गिरिं तमवलोकयन् |
वायुसूनुर्निरालम्बे जगाम विमलेऽम्बरे || १-५-१३६

तद्द्वितीयं हनुमतो दृष्ट्वा कर्म सुदुष्करम् |
प्रशशंसुः सुराः सर्वे सिद्धाश्च परमर्षयः || १-५-१३७

देवताश्चाभवन् हृष्टास्तत्रस्थास्तस्य कर्मणा |
काञ्चनस्य सुनाभस्य सहस्राक्षश्च वासवः || १-५-१३८

उवाच वचनं धीमान् परितोषात्सगद्गदम् |
सुनाभं पर्वतश्रेष्ठं स्वयमेव शचीपतिः || १-५-१३९

हिरण्यनाभ शैलेन्द्र परितुष्टोऽस्मि ते भृशम् |
अभयं ते प्रयच्छामि तिष्ठ सौम्य यथासुखम् || ५-१-१४०

साह्यं ते सुमहद्विक्रान्तस्य हनूमतः |
क्रमतो योजनशतं निर्भयस्य भये सति || ५-१-१४१

रामस्यैष हितायैव याति दाशरथेर्हरिः |
सत्क्रियां कुर्वता तस्य तोषितोऽस्मि दृढं त्वया || ५-१-१४२

ततः प्रहर्षमगमद्विपुलं पर्वतोत्तमः |
देवतानां पतिं दृष्ट्वा परितुष्टं शतक्रतुम् || ५-१-१४३

स वै दत्तवरः शैलो बभूवावस्थितस्तदा |
हनुमांश्च मुहूर्तेन व्यतिचक्राम सागरम् || ५-१-१४४

ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः |
अब्रूवन् सूर्यसंकाशां सुरसां नागमातरम् || ५-१-१४५

अयं वातात्मजः श्रीमान्प्लवते सागरोपरि |
हनुमान्नाम तस्य त्वं मुहूर्तं विघ्नमाचर || ५-१-१४६
राक्षसं रूपमास्थाय सुघोरं पर्वतोपमम् |
दंष्ट्रकराळं पिङ्गाक्षं वक्त्रं कृत्वा नभःसमम् || ५-१-१४७

बलमिच्छामहे ज्ञातुं भूयश्चास्य पराक्रमम् ।
त्वां विजेष्यत्युपायेन विषादं वा गमिष्यति ।। ५-१-१४८

एवमुक्ता तु सा देवी दैवतैरभिसत्कृता ।
समुद्रमध्ये सुरसा बिभ्रती राक्षसं वपुः ।। ५-१-१४९
विकृतं च विरूपं च सर्वस्य च भयावहम् ।
प्लवमानं हनूमन्तमावृत्येदमुवाच ह ।। ५-१-१५०

मम भक्षः प्रदिष्टस्त्वमीश्वरैर्वानरर्षभ ।
अहं त्वा भक्षयिष्यामि प्रविशेदं ममाननम् ।। ५-१-१५१

एवमुक्तः सुरसया प्राञ्जलिर्वानरर्षभः ।
प्रहृष्टवदनः श्रीमानिदं वचनमब्रवीत् ।। १-५-१५२

रामो दाशरथिर्नाम प्रविष्टो दण्डकावनम् ।
लक्ष्मणेन सह भ्रात्रा वैदेह्या चापि भार्यया ।। ५-१-१५३

अन्यकार्यविषक्तस्य बद्धवैरस्य राक्षसैः ।
तस्य सीत हृता भार्या रावणेन यशस्विनी ।। ५-१-१५४

तस्याः सकाशं दूतोऽहं गमिष्ये रामकारणात् ।
कर्तुमर्हसि रामस्य साह्यं विषयवासिनि ।। ५-१-१५५

अथवा मैथिलीं दृष्ट्वा रामं चाक्लिष्टकारिणम् ।
आगमिष्यामि ते वक्त्रं सत्यं प्रतिशृणोमि ते ।। ५-१-१५६

एवमुक्ता हनुमता सुरसा कामरूपिणी ।
अब्रवीन्नातिवर्तेत कश्चिदेष वरो मम ।। ५-१-१५७

तं प्रयान्तं समुद्वीक्ष्य सुरसा वाक्यमब्रवीत् ।
बलं जिज्ञासमाना वै नागमाता हनूमतः ।। ५-१-१५८

प्रविश्य वदनं मेऽद्य गन्तव्यं वानरोत्तम ।
वर एष पुरा दत्तो मम धात्रेति सत्वरा ।। ५-१-१५९
व्यादाय विपुलं वक्त्रं स्थिता सा मारुतेः पुरः ।

एवमुक्तः सुरसया क्रुद्धो वानरपुङ्गवः || ५-१-१६०
अब्रवीत्कुरु वै वक्त्रं येन मां विषहिष्यसे |

प्रविश्य वदनं मेऽद्य ग्न्तव्यं वानरोत्तम |
वर एष पुरा दत्तो ममम् धात्रेति सत्वरा || ५-१-१६१
व्यादाय विपुलं वक्त्रं स्थिता सा मरुतेः पुरः |

तं दृष्ट्वा मेघसंकाशं दशयोजनमायतम् || ५-१-१६२
चकार सुरसा चास्यं विंशद्योजनमायतम् |

हनुमांस्तु ततः क्रुद्धस्त्रिंशद्योजनमायतः || ५-१-१६३
चकार सुरसा वक्त्रं चत्वारिंशत्तथोच्छ्रितम् |
बभूव हनुमान्वीरः पञ्चाशद्योजनोच्छ्रितः || ५-१-१६४

चकार सुरसा वक्त्रं षष्टियोजनमायतम् |
तथैव हनुमान्वीरः सप्ततीयोजिनोच्छ्रितः || ५-१-१६५

चकार सुरसा व्क्त्रंशीतीयोजनोच्छ्रितम् |
हनुमानचलप्रख्यो नवतीयोजनोच्छ्रितः || ५-१-१६६

तद्दृष्ट्वा व्यादितं त्वास्यं वायुपुत्रः सुबुद्धिमान् |
दीर्घजिह्वं सुरसया सुघोरं नरकोपमम् || ५-१-१६७
सुसंक्षिप्यात्मनः कायं बभूवाङ्गुष्ठमात्रकः |

सोऽभिपत्याशु तद्वक्त्रं निष्पत्य च महाजवः |
अन्तरिक्षे स्थितः श्रीमानिदं वचनमब्रवीत् || ५-१-१६८

प्रविष्टोऽस्मि हि ते वक्त्रं दाक्षायणि नमोऽस्तु ते |
गमिष्ये यत्र वैदेही सत्यं चासीद्वरस्तव ||५-१-१६९

तं दृष्ट्वा वदनान्मुक्तं चन्द्रं राहुमुखादिव |
अब्रवीत्सुरसा देवी स्वेन रूपेण वानरम् || ५-१-१७०

अर्थसिद्ध्यै हरिश्रेष्ठ गच्छ सौम्य यथासुखम् |
समानयस्व वैदेहीं राघवेण महात्मना || ५-१-१७१

तत्तृतीयं हनुमतो दृष्ट्वा कर्म सुदुष्करम् |
साधु साध्विति भूतानि प्रशशंसुस्तदा हरिम् || ५-१-१७२

स सागरमनाधृष्यमभ्येत्य वरुणालयम् |
जगामाकाशमाविश्य वेगेन गरुडोपमः || ५-१-१७३

चरिते कैशिकाचार्यैरैरावतनिषेविते || ५-१-१७४
सिंहकुञ्जरशार्दूलपतगोरगवाहनैः |
विमानैः संपतद्भिश्च विमलैः समलंकृते || ५-१-१७५
वज्राशनिसमाघातैः पावकैरुपशोभिते |
कृतपुण्यैर्महाभागैः स्वर्गजिद्भिरलंकृते || ५-१-१७६
वहता हव्यमत्यर्थं सेविते चित्रभानुना |
ग्रहनक्षत्रचन्द्रार्कतारागणविभूषिते || ५-१-१७७
महर्षिगणगन्धर्वनागयक्षसमाकुले |
विविक्ते विमले विश्वे विश्वावसुनिषेविते || ५-१-१७८
देवराजगजाक्रान्ते चन्द्रसूर्यपथे शिवे |
विताने जीवलोकस्य वितते ब्रह्मनिर्मिते || ५-१-१७९
बहुशः सेविते वीरैर्विद्याधरगणैर्वरैः |
जगाम वायुमार्गे तु गरुत्मानिव मारुतिः || ५-१-१८०

प्रदृश्यमानः सर्वत्र हनुमान्मारुतात्मजः |
भेजेऽम्बरं निरालम्बं लम्बपक्ष इवाद्रिराट् || ५-१-१८१

प्लवमानं तु तं दृष्ट्वा सिंहिका नाम राक्षसी |
मनसा चिन्तयामास प्रवृद्धा कामरूपिणी || ५-१-१८२

अद्य दीऱ्हस्य कालस्य भविष्याम्यहामाशिता |
इदं हि मे महत्सत्त्वं चिरस्य वशमागतम् || ५-१-१८३

इति संचिन्त्य मनसा छायामस्य समाक्षिपत् |
छायायां गृह्यमाणायां चिन्तयामास वानरः || ५-१-१८४

समाक्षिप्तोऽस्मि तरसा पङ्गूकृतपराक्रमः |
प्रतिलोमेन वातेन महानौरिव सागरे || ५-१-१८५

तिर्यगूर्ध्वमधश्चैव वीक्षिमाणस्ततः कपिः |
ददर्श स महत्सत्त्वमुत्थितं लवणाम्भसि || ५-१-१८६

छायतद्धृष्ट्वा चिन्तयामास मारुतिर्विकृताननम् |
कपिराजेन कथितं सत्त्वमद्भुतदर्शनम् || ५-१-१८७

आग्राहि महावीर्यं तदिदं नात्र संशयः |
स तां बुद्ध्वार्थतत्त्वेन सिंहिकां मतिमान्कपिः |
व्यवर्धत महाकायः प्रवृषीव वलाहकः || ५-१-१८८

तस्य सा कायमुद्वीक्ष्य वर्धमानं महाकपेः || ५-१-१८९
वक्त्रं प्रसारयामास पाताळान्तरसन्निभम् |

घनराजीव गर्जन्ती वानरं सम्भिद्रवत् || ५-१-१९०
स ददर्श ततस्तस्या विवृतं सुमहन्मुखम् |
कायमात्रं च मेधावी मर्माणि च महाकपिः || ५-१-१९१

स तस्या विवृते वक्त्रे वज्रसंहननः कपिः |
संक्षिप्य मुहुरात्मानं निष्पपात महाबलः || ५-१-१९२

आस्ये तस्या निमज्जन्तं ददृशुः सिद्धचारणाः |
ग्रस्यमानं यथा चन्द्रं पूर्णं पर्वणि राहुणा || ५-१-१९३

ततस्तस्या नखैस्तीक्ष्णैर्मर्माण्युत्कृत्य वानरः |
उत्पपाताथ वेगेन मनः संपातविक्रमः || ५-१-१९४

तां तु दृष्ट्वा च धऋत्या च दाक्षिण्येन निपात्य च |
स कपिप्रवरो वेगाद्ववृधे पुनरात्मवान् || ५-१-१९५

हृतहृत्सा हनुमता पपात विधुराम्भसि |
तां हतां वानरेणाशु पतितां वीक्ष्य सिंहिकाम् || ५-१-१९६
भूतान्याकाशचारीणी तमूचुः प्लवगोत्तमम् |

भीममद्य कृतं कर्म महत्सत्त्वं त्वया हतम् || ५-१-१९७
साधयार्थमभिप्रेतमरिष्टं प्लवतां वर |

यस्य त्वेतानि चत्वारि वानरेन्द्र यथा तव || ५-१९८
धृतिर्दृष्टिर्मतिर्दाक्ष्यं स कर्मसु न सीदति |

स तैः संभावितः पूज्यः प्रतिपन्नप्रयोजनः || ५-१-१९९
जगामाकाशमाविश्य पन्नगाशनवत्कपिः |

प्राप्तभूयिष्ठपारस्तु सर्वतः प्रतिलोकयन् || ५-१-२००
योजनानां शतस्यान्ते वनराजिं ददर्श सः |

ददर्श च पतन्नेव विविधद्रुमभूषितम् || ५-१-२०१
द्वीपं शाखामृगश्रेष्ठो मलयोपवनानि च |

सागरं सागरानूपं सागरानूपजान् द्रुमान् || ५-१-२०२
सागरस्य च पत्नीनां मुखान्यपि विलोकयन् |
स महामेघसंकाशं समीक्ष्यात्मानमात्मवान् || ५-१-२०३
निरुन्धन्तमिवाकाशं चकार मतिमान् मतिम् |

कायवृद्धिं प्रवेगं च मम दृष्ट्वैव राक्षसाः || ५-१-२०४
मयि कौतूहलं कुर्युरिति मेने महाकपिः |

ततः शरीरं संक्षिप्य तन्महीधरसन्निभम्|| ५-१-२०५
पुनः प्रकृतिमापेदे वीतमोह इवात्मवान् |

तद्रूपमतिसंक्षिप्य हनुमान् प्रकृतौ स्थितः || ५-१-२०६
त्रीन् क्रमानिव विक्रम्य बलिवीर्यहरो हरिः |

स चारुनानाविधरूपधारी |
परं समासाद्य समुद्रतीरम् |
परैरशक्यः प्रतिपन्नरूपः |
समीक्षितात्मा समवेक्षितार्थः || ५-१-२०७

**ततः स लम्बस्य गिरेः समृद्धे |**
**विचित्रकूटे निपपात कूटे |**
**सकेतकोद्दालकनाळिकेरे |**
**महाभ्रकूटप्रतिमो महात्मा || ५-१-२०८**

**ततस्तु संप्राप्य समुद्रतीरं |**
**समीक्ष्य लङ्कां गिरिवर्यमूर्ध्नि |**
**कपिस्तु तस्मिन्निपपात पर्वते |**
**विधूय रूपं व्यथयन्मृगद्विजान् || ५-१-२०९**

**स सागरं दानवपन्नगायुतं |**
**बलेन विक्रम्य महोर्मिमालिनम् |**
**निपत्य तीरे च महोदधेस्तदा |**
**ददर्श लङ्काममरावतीमिव || ५-१-२१०**

**इत्यर्षे श्री मद्रामायणे आदिकाव्ये सुन्दरकाण्डे प्रथमः सर्गः**



# V : Sundara Kanda - Sargam 65

ततः प्रस्रवणम् शैलम् ते गत्वा चित्र काननम् ।
प्रणम्य शिरसा रामम् लक्ष्मणम् च महाबलम् ॥ ५-६५-१
युव राजम् पुरः कृत्य सुग्रीवम् अभिवाद्य च ।
प्रवृत्तम् अथ सीतायाः प्रवक्तुम् उपचक्रमुः ॥ ५-६५-२

रावण अन्तः पुरे रोधम् राक्षसीभिः च तर्जनम् ।
रामे समनुरागम् च यः च अपि समयः कृतः ॥ ५-६५-३
एतत् आख्यान्ति ते सर्वे हरयो राम सन्निधौ ।

वैदेहीम् अक्षताम् श्रुत्वा रामः तु उत्तरम् अब्रवीत् ॥ ५-६५-४
क्व सीता वर्तते देवी कथम् च मयि वर्तते ।
एतन् मे सर्वम् आख्यात वैदेहीम् प्रति वानराः ॥ ५-६५-५

रामस्य गदितम् श्रुत्व हरयो राम सन्निधौ ।
चोदयन्ति हनूमन्तम् सीता वृत्त अन्त कोविदम् ॥ ५-६५-६

श्रुत्वा तु वचनम् तेषाम् हनूमान् मारुत आत्मजः ।
प्रणम्य शिरसा देव्यै सीतायै ताम् दिशम् प्रति ॥ ५-६५-७
उवाच वाक्यम् वाक्यज्ञः सीताया दर्शनम् यथा ।

समुद्रम् लन्घयित्वा अहम् शत योजनम् आयतम् ॥ ५-६५-८
अगच्छम् जानकीम् सीताम् मार्गमाणो दिदृक्षया ।

तत्र लन्का इति नगरी रावणस्य दुरात्मनः ॥ ५-६५-९
दक्षिणस्य समुद्रस्य तीरे वसति दक्षिणे ।

तत्र दृष्टा मया सीता रावण अन्तः पुरे सती ॥ ५-६५-१०
सम्न्यस्य त्वयि जीवन्ती रामा राम मनो रथम् ।

दृष्टा मे राक्षसी मध्ये तर्ज्यमाना मुहुः मुहुः ॥ ५-६५-११
राक्षसीभिः विरूपाभी रक्षिता प्रमदा वने ।
दुह्खम् आपद्यते देवी तव अदुह्ख उचिता सती ॥ ५-६५-१२

रावण अन्तः पुरे रुद्ध्वा राक्षसीभिः सुरक्षिता |
एक वेणी धरा दीना त्वयि चिन्ता परायणा || ५-६५-१३
अधः शय्या विवर्ण अन्गी पद्मिनी इव हिम आगमे |
रावणात् विनिवृत्त अर्था मर्तव्य कृत निश्चया || ५-६५-१४
देवी कथंचित् काकुत्स्थ त्वन् मना मार्गिता मया |

इक्ष्वाकु वंश विख्यातिम् शनैः कीर्तयत अनघ || ५-६५-१५
स मया नर शार्दूल विश्वासम् उपपादिता |

ततः सम्भाषिता देवी सर्वम् अर्थम् च दर्शिता || ५-६५-१६
राम सुग्रीव सख्यम् च श्रुत्वा प्रीतिम् उपागता |
नियतः समुदाचारो भक्तिः च अस्याः तथा त्वयि || ५-६५-१७

एवम् मया महाभागा दृष्टा जनक नन्दिनी |
उग्रेण तपसा युक्ता त्वत् भक्त्या पुरुष ऋषभ || ५-६५-१८

अभिज्ञानम् च मे दत्तम् यथा वृत्तम् तव अन्तिके |
चित्र कूटे महाप्राज्ञ वायसम् प्रति राघव || ५-६५-१९

विज्ञाप्यः च नर व्याघ्रो रामो वायु सुत त्वया |
अखिलेन इह यत् दृष्टम् इति माम् आह जानकी || ५-६५-२०

अयम् च अस्मै प्रदातव्यम् यत्नात् सुपरिरक्षितम् |
ब्रुवता वचनानि एवम् सुग्रीवस्य उपशृण्वतः || ५-६५-२१

एष चूडा मणिः श्रीमान् मया ते यत्न रक्षितः |
मनः शिलायाः तिकलः तम् स्मरस्व इति च अब्रवीत् || ६५-२२
त्वया प्राष्टे तिम्के तम् किल स्मर्तुमर्हसि |

एष निर्यातितः श्रीमान् मया ते वारि सम्भवः || ५-६५-२३
एतम् दृष्ट्वा प्रमोदिष्ये व्यसने त्वाम् इव अनघ |

जीवितम् धारयिष्यामि मासम् दशरथ आत्मज || ५-६५-२४
ऊर्ध्वम् मासान् न जीवेयम् रक्षसाम् वशम् आगता |

इति माम् अब्रवीत् सीता कृश अन्गी धर्म चारिणी || ५-६५-२५
रावण अन्तः पुरे रुद्धा मृगी इव उत्फुल्ल लोचना |

एतत् एव मया आख्यातम् सर्वम् राघव यत् यथा || ५-६५-२६
सर्वथा सागर जले सम्तारः प्रविधीयताम् |

तौ जात आश्वासौ राज पुत्रौ विदित्वा |
तच् च अभिज्ञानम् राघवाय प्रदाय |
देव्या च आख्यातम् सर्वम् एव आनुपूर्व्यात् |
वाचा सम्पूर्णम् वायु पुत्रः शशंस || ५-६५-२७

इत्यार्षे श्रीमद्रामायणे आदिकाव्ये

सुन्दरकाण्डे पञ्चषष्टितमः सर्गः





# VI : Yuddha Kanda - Sargam 19

राघवेन अभये दत्ते सन्नतो रावण अनुजः |
विभीषणो महाप्राज्ञो भूमिम् समवलोकयत् || ६-१९-१

खात् पपात अवनिम् हृष्टो भक्तैर् अनुचरैः सह |
स तु रामस्य धर्म आत्मा निपपात विभीषणः || ६-१९-२

पादयोः शरण अन्वेषी चतुर्भिः सह राक्षसैः |
अब्रवीच् च तदा रामम् वाक्यम् तत्र विभीषणः || ६-१९-३
धर्म युक्तम् च युक्तम् च साम्प्रतम् सम्प्रहर्षणम् |

अनुजो रावणस्य अहम् तेन च अस्मि अवमानितः || ६-१९-४
भवन्तम् सर्व भूतानाम् शरण्यम् शरणम् गतः |

परित्यक्ता मया लंका मित्राणि च धनानि च || ६-१९-५
भवद् गतम् हि मे राज्यम् च जीवितम् च सुखानि च |

तस्य तद्वचनम् श्रुत्वा रामो वचनमब्रवीत् || ६-१९-६
वचसा सान्त्वयित्वैनम् लोचनाभ्याम् पिबन्निव |
आख्याहि मम तत्वेन राक्षसानाम् बलाबलम् || ६-१९-७

एवमुक्तम् तदा रक्षो रामेणाक्लिष्टकर्मणा |
रावणस्य बलम् सर्वमाख्यातुमुपचक्रमे || ६-१९-८

अवध्यः सर्वभूतानाम् गन्धर्वोरगपक्षिणाम् |
राजपुत्र दशग्रीवो वरदानात्स्वयम्भुवः || ६-१९-९

रावणानन्तरो भ्राता मम ज्येष्ठश्च वीर्यवान् |
कुम्भकर्णो महातेजाः शक्रप्रतिबलो युधि || ६-१९-१०

राम सेनापतिस्तस्य प्रहस्तो यदि ते श्रुतः |
कैलासे येन सम मणिभद्रः पराजितः || ६-१९-११

बद्दगोधाङ्गुलित्रश्च अवध्यकवचो युधि |
धनुरादाय यस्तिष्ठन्नदृश्यो भवतीन्द्रजित् || ६-१९-१२

सम्ग्रामे सुमहद्व्यूहे तर्पयित्वा हुताशनम् |
अन्तर्धानगतः श्रीमानिन्द्रजिद्धन्ति राघव || ६-१९-१३

महोदरमहापार्स्वौ राक्षसश्चाप्यकम्पनः |
अवीकपास्तु तप्यैते लोकपालसमा युधि || ६-१९-१४

दशकोटिसहस्राणि रक्षसाम् कामरूपिणाम् |
मांसशोणितभक्ष्याणाम् लङ्कापुरनिवासिनाम् || ६-१९-१५

स तैस्तु सहितो राजा लोकपालानयोधयत् |
सह देवैस्तु ते भग्ना रावणेन दुरात्मना || ६-१९-१६

विभीषणस्य तु वचस्तच्छ्रुत्वा रघुसत्तमः |
अन्वीक्ष्य मनसा सर्वमिदम् वचनमब्रवीत् || ६-१९-१७

यानि कर्मापदानानि रावणस्य विभीषण |
अख्यातानि च तत्त्वेन ह्यवगच्चामि तान्यहम् || ६-१९-१८

अहम् हत्वा दशग्रीवम् सप्रहस्तम् सहात्मजम् |
राजानम् त्वाम् करिष्यामि सत्यमेतच्छृणोतु मे || ६-१९-१९

रसातलम् वा प्रविशेत्पातालम् वापि रावणः |
पितामहसकाशम् वा न मे जीवन्विमोक्ष्यते || ६-१९-२०

अहत्वा रावणम् सम्ख्ये सपुत्रजनबान्धवम् |
अयोध्याम् न प्रवेक्ष्यामि त्रिभिस्तैर्भ्रतृभिः शपेः || ६-१९-२१

श्रुत्वा तु वचनम् तस्य रामस्याक्लिष्टकर्मणः |
शिरसा वन्द्य धर्मात्मा वक्तुमेव प्रचक्रमे || ६-१९-२२

राक्षसानाम् वधे साह्यम् लंकायाः च प्रधर्षणे |
करिष्यामि यथा प्राणम् प्रवेक्ष्यामि च वाहिनीम् || ६-१९-२३

**इति ब्रुवाणम् रामस् तु परिष्वज्य विभीषणम् |**
**अब्रवील् लक्ष्मणम् प्रीतः समुद्राज् जलम् आनय || ६-१९-२४**

**तेन च इमम् महाप्राज्ञम् अभिषिन्च विभीषणम् |**
**राजानम् रक्षसाम् क्षिप्रम् प्रसन्ने मयि मानद || ६-१९-२५**

**एवम् उक्तस् तु सौमित्रिर् अभ्यषिन्चद् विभीषणम् |**
**मध्ये वानर मुख्यानाम् राजानम् राम शासनात् || ६-१९-२६**

**तम् प्रसादम् तु रामस्य दृष्ट्वा सद्यः प्लवम् गमाः |**
**प्रचुक्रुशुर् महानादान् साधु साध्व् इति च अब्रुवन् || ६-१९-२७**

**अब्रवीच् च हनूमामः च सुग्रीवः च विभीषणम् |**
**कथम् सागरम् अक्षोभ्यम् तराम वरुण आलयम् || ६-१९-२८**
**सैन्यैः परिवृताः सर्वे वानराणाम् महौजसाम् |**

**उपायैर् अभिगच्चामो यथा नद नदी पतिम् || ६-१९-२९**
**तराम तरसा सर्वे ससैन्या वरुण आलयम् |**

**एवम् उक्तस् तु धर्मज्ञः प्रत्युवाच विभीषणः || ६-१९-३०**
**समुद्रम् राघवो राजा शरणम् गन्तुम् अर्हति |**

**खानितः सगरेण अयम् अप्रमेयो महाउदधिः || ६-१९-३१**
**कर्तुम् अर्हति रामस्य ज्ञातेः कार्यम् महाउदधिः |**

**एवम् विभीषणेन उक्ते राक्षसेन विपश्चिता || ६-१९-३२**
**आजगामथ सुग्रीवो यत्र रामः सलक्ष्मणः |**

**ततश्चाख्यातुमारेभे विभीषणवचः शुभम् || ६-१९-३३**
**सुग्रीवो विपुलग्रीवः सागरस्योपवेशनम् |**

**प्रकृत्या धर्म शीलस्य राघवस्य अपि अरोचत || ६-१९-३४**
**स लक्ष्मणम् महातेजाः सुग्रीवम् च हरि ईश्वरम् |**
**सत् क्रिया अर्थम् क्रिया दक्षः स्मित पूर्वम् उवाच ह || ६-१९-३५**

विभीषणस्य मन्त्रो अयम् मम लक्ष्मण रोचते |
सुग्रीवः पण्डितो नित्यम् भवान् मन्त्र विचक्षणः || ६-१९-३६
उभाभ्याम् सम्प्रधार्य आर्यम् रोचते यत् तद् उच्यताम् |

एवम् उक्तौ तु तौ वीराव् उभौ सुग्रीव लक्ष्मणौ || ६-१९-३७
समुदाचार सम्युक्तम् इदम् वचनम् ऊचतुः |

किम् अर्थम् नो नर व्याघ्र न रोचिष्यति राघव || ६-१९-३८
विभीषणेन यत् तु उक्तम् अस्मिन् काले सुख आवहम् |

अबद्ध्वा सागरे सेतुम् घोरे अस्मिन् वरुण आलये || ६-१९-३९
लंका न आसादितुम् शक्या स इन्द्रैर् अपि सुर असुरैः |

विभीषणस्य शूरस्य यथा अर्थम् क्रियताम् वचः || ६-१९-४०
अलम् काल अत्ययम् कृत्वा समुद्रो अयम् नियुज्यताम् |
यथा कालात्ययम् कृत्वा सागराय नियुज्यताम् || ६-१९-४१

एवम् उक्तः कुश आस्तीर्णे तीरे नद नदी पतेः |
सम्विवेश तदा रामो वेद्याम् इव हुत अशनः || ६-१९-४२

इत्यार्षे श्रीमद्रामायणे आदिकाव्ये
युद्धकाम्डे एकोनविंशः सर्गः





# VI : Yuddha Kanda -Sargam 115

तां तु पार्श्वे स्थितां प्रह्वां रामः संप्रेक्ष्ये मैथिलीम् |
हृदयान्तर्गतं भावं व्याहर्तुमुपचक्रमे || ६-११५-१

एषासि निर्जिता भद्रे शत्रुं जित्वा रणाजिरे |
पौरुषाद्यदनुष्ठेयं मयैतदुपपादितम् || ६-११५-२

गतोऽस्म्यन्तममर्षस्य धर्षणा संप्रमार्जिता |
अवमानश्च शत्रुश्च युगपन्निहतौ मया || ६-११५-३

अद्य मे पौरुषं दृष्टमद्य मे सफलः श्रमः |
अद्य तीर्णप्रतिज्ञोऽहं प्रभवाम्यद्य चात्मनः || ६-११५-४

या त्वं विरहिता नीता चलचित्तेन रक्षसा |
दैवसंपादितो दोषो मानुषेण मया जितः || ६-११५-५

संप्राप्तमवमानं यस्तेजसा न प्रमार्जति |
कस्तस्य पौरुषेणार्थो महताप्यल्पचेतसः || ६-११५-६

लङ्घनं समुद्रस्य लङ्कायाश्चापि मर्दनम् |
सफलं तस्य च श्लाघ्यमद्य कर्म हनूमतः || ६-११५-७

युद्धे विक्रमतश्चैव हितं मन्त्रयतस्तथा |
सुग्रीवस्य ससैन्यस्य सफलोऽद्य परिश्रमः || ६-११५-८

विभीषणस्य च तथा सफलोऽद्य परिश्रमः |
विगुणं भ्रातरं त्वक्त्वा यो मां स्वयमुपस्थितः || ६-११५-९

इत्येवं वदतः श्रुत्वा सीता रामस्य तद्वचः |
मृगीवोत्फुल्लनयना बभूवाश्रुपरिप्लुता || ६-११५-१०

पश्यतस्तां तु रामस्य समीपे हृदयप्रियाम् |
जनवादभयाद्राज्ञो बभूव हृदयं द्विधा || ६-११५-११

सीतामुत्पलपत्राक्षीं नीलकुञ्चितमूर्धजाम् ।
अवदद्वै वरारोहां मध्ये वानररक्षसाम् ॥ ६-११५-१२

यत्कर्तव्यं मनुष्येण धर्षणां प्रतिमार्जता ।
तत्कृतं रावणं हत्वा मयेदं मानकाङ्क्षिणा ॥ ६-११५-१३

निर्जिता जीवलोकस्य तपसा भावितात्मना ।
अगस्त्येन दुराधर्षा मुनिना दक्षिणेव दिक् ॥ ६-११५-१४

विदितश्चास्तु भद्रं ते योऽयं रणपरिश्रमः ।
सुतीर्णः सुहृदां वीर्यान्न त्वदर्थं मया कृतः ॥ ६-११५-१५
रक्षता तु मया वृत्तमपवादम् च सर्वतः ।
प्रख्यातस्यात्मवंशस्य न्यङ्गं च परिमार्जता ॥ ६-११५-१६

प्राप्तचारित्रसंदेह मम प्रतिमुखे स्थिता ।
दीपो नेत्रातुरस्येव प्रतिकूलासि मे दृढम् ॥ ६-११५-१७

तद्गच्छ त्वानुजानेऽद्य यथेष्टं जनकात्मजे ।
एता दश दिशो भद्रे कार्यमस्ति न मे त्वया ॥ ६-११५-१८

कः पुमांस्तु कुले जातह् स्त्रियं परगृहोषिताम् ।
तेजस्वी पुनरादद्यात् सुहृल्लेख्येन चेतसा ॥ ६-११५-१९

रावणाङ्कपरिक्लिष्टां दृष्टां दुष्टेन चक्षुषा ।
कथं त्वां पुनरादद्यां कुलं व्यपदिशन् महत् ॥ ६-११५-२०

तदर्थं निर्जिता मे त्वं यशः प्रत्याहृतं मया ।
नास्थ् मे त्वय्यभिष्वङ्गो यथेष्टं गम्यतामितः ॥ ६-११५-२१

तदद्य व्याहृतं भद्रे मयैतत् कृतबुद्धिना ।
लक्ष्मणे वाथ भरते कुरु बुद्धिं यथासुखम् ॥ ६-११५-२२

शत्रुघ्ने वाथ सुग्रीवे राक्षसे वा विभीषणे ।
निवेशय मनः सीते यथा वा सुखमात्मनः ॥ ६-११५-२३

**न हि त्वां रावणो दृष्ट्वा दिव्यरूपां मनोरमाम् ।**
**मर्षयेत चिरं सीते स्वगृहे पर्यवस्थिताम् ॥ ६-११५-२४**

**तः प्रियार्हश्रवणा तदप्रियं ।**
**प्रियादुपश्रुत्य चिरस्य मैथिली ।**
**मुमोच बाष्पं सुभृशं प्रवेपिता ।**
**गजेन्द्रहस्ताभिहतेव वल्लरी ॥ ६-११५-२५**

**इत्यार्षे श्रीमद्रामायणे आदिकाव्ये**
**युद्धकाण्डे पञ्चदशाधिकशततमः सर्गः**






# VI : Yuddha Kanda - Sargam 128

शिरस्यञ्जलिमादाय कैकेयीनन्दिवर्धनः |
बभाषे भरतो ज्येष्ठन् रामं सत्यपराक्रमम् || ६-१२८-१

पूजिता मामिका माता दत्तन् राज्यमिदं मम |
तद्ददामि पुनस्तुभ्यन् यथा त्वमददा मम || ६-१२८-२

धुरमेकाकिना न्यस्तामृषभेण बलीयसा |
किशोरवद्गुरुं भारं न वोढुमहमुत्सहे || ६-१२८-३

वारिवेगेन महता भिन्नः सेतुरिव क्षरन् |
दुर्बन्धनमिदं मन्ये राज्यच्छिद्रमसन्वृतम् || ६-१२८-४

गतिं खर इवाश्वस्य हन्सस्येव च वायसः |
नान्वेतुमुत्सहे देव तव मार्गमरिन्दम || ६-१२८-५

यथा च रोपितो वृक्षो जातश्चान्तर्निवेशने |
महांश्च सुदुरारोहो महास्कन्धः प्रशाखवान् || ६-१२८-६
शीर्येत पुष्पितो भूत्वा न फलानि प्रदर्शयेत् |
तस्य नानुभवेदर्थन् यस्य हेतोः स रोप्यते || ६-१२८-७
एषोपमा महाबाहो त्वमर्थन् वेत्तुमर्हसि |
यद्यस्मान्मनुजेन्द्र त्वं भक्तान्भृत्यान्न शाधि हि || ६-१२८-८

जगदद्याभिषिक्तन् त्वामनुपश्यतु सर्वतः |
प्रतपन्तमिवादित्यं मध्याह्ने दीप्ततेजसं || ६-१२८-९

तूर्यसङ्घातनिर्घोषैः काञ्चीनूपुरनिस्वनैः |
मधुरैर्गीतशब्दैश्च प्रतिबुध्यस्व शेष्व च || ६-१२८-१०

यावदावर्तते चक्रन् यावती च वसुन्धरा |
तावत्त्वमिह सर्वस्य स्वामित्वमभिवर्तय || ६-१२८-११
भरतस्य वचः श्रुत्वा रामः परपुरञ्जयः |
तथेति प्रतिजग्राह निषसादासने शुभे || ६-१२८-१२

ततः शत्रुघ्नवचनान्निपुणाः श्मश्रुवर्धकाः ।
सुखहस्ताः सुशीघ्राश्च राघवं पर्युपासत ॥ ६-१२८-१३

पूर्वन् तु भरते स्नाते लक्ष्मणे च महाबले ।
सुग्रीवे वानरेन्द्रे च राक्षसेन्द्रे विभीषणे ॥ ६-१२८-१४
विशोधितजटः स्नातश्चित्रमाल्यानुलेपनः ।
महार्हवसनोपेतस्तस्थौ तत्र श्रिया ज्वलन् ॥ ६-१२८-१५

प्रतिकर्म च रामस्य कारयामास वीर्यवान् ।
लक्ष्मणस्य च लक्ष्मीवानिक्ष्वाकुकुलवर्धनः ॥ ६-१२८-१६

प्रतिकर्म च सीतायाः सर्वा दशरथस्त्रियः ।
आत्मनैव तदा चक्रुर्मनस्विन्यो मनोहरम् ॥ ६-१२८-१७

ततो राघवपत्नीनान् सर्वासामेव शोभनम् ।
चकार यत्नात्कौसल्या प्रहृष्टा पुत्रवत्सला ॥ ६-१२८-१८

ततः शत्रुघ्नवचनात्सुमन्त्रो नाम सारथिः ।
योजयित्वाभिचक्राम रथन् सर्वाङ्गशोभनम् ॥ ६-१२८-१९

अर्कमण्डलसङ्काशन् दिव्यं दृष्ट्वा रथन् स्थितम् ।
आरुरोह महाबाहू रामः सत्यपराक्रमः ॥ ६-१२८-२०

सुग्रीवो हनुमांश्चैव महेन्द्रसदृशद्युती ।
स्नातौ दिव्यनिभैर्वस्त्रैर्जग्मतुः शुभकुण्डलौ ॥ ६-१२८-२१

सर्वाभरणजुष्टाश्च ययुस्ताः शुभकुण्डलाः ।
सुग्रीवपत्न्याः सीता च द्रष्टुं नगरमुत्सुकाः ॥ ६-१२८-२२

अयोध्यायान् तु सचिवा राज्ञो दशरथस्य च ।
पुरोहितं पुरस्कृत्य मन्त्रयामासुरर्थवत् ॥ ६-१२८-२३

अशोको विजयश्चैव सिद्धार्थश्च समाहिताः ।
मन्त्रयन्नामवृद्ध्यर्थन् वृत्त्यर्थं नगरस्य च ॥ ६-१२८-२४

सर्वमेवाभिषेकार्थन् जयार्हस्य महात्मनः |
कर्तुमर्हथ रामस्य यद्यन्मङ्गलपूर्वकम् || ६-१२८-२५

इति ते मन्त्रिणः सर्वे सन्दिश्य तु पुरोहितम्
नगरान्निर्ययुस्तूर्णन् रामदर्शनबुद्धयः || ६-१२८-२६

हरियुक्तन् सहस्राक्षो रथमिन्द्र इवानघः |
प्रययौ रथमास्थाय रामो नगरमुत्तमम् || ६-१२८-२७

जग्राह भरतो रश्मीञ्शत्रुघ्नश्छत्रमाददे |
लक्ष्मणो व्यजनन् तस्य मूर्ध्नि सम्पर्यवीजयत् || ६-१२८-२८
श्वेतन् च वालव्यजनन् सुग्रीवो वानरेश्वरः |
अपरन् चन्द्रसङ्काशन् राक्षसेन्द्रो विभीषणः || ६-१२८-२९

ऋषिसङ्घैर्तदाकाशे देवैश्च समरुद्गणैः |
स्तूयमानस्य रामस्य शुश्रुवे मधुरध्वनिः || ६-१२८-३०

ततः शत्रुञ्जयं नाम कुञ्जरं पर्वतोपमम् |
आरुरोह महातेजाः सुग्रीवो वानरेश्वरः || ६-१२८-३१

नवनागसहस्राणि ययुरास्थाय वानराः |
मानुषन् विग्रहन् कृत्वा सर्वाभरणभूषिताः || ६-१२८-३२

शङ्खशब्दप्रणादैश्च दुन्दुभीनान् च निस्वनैः |
प्रययू पुरुषव्याघ्रस्तां पुरीन् हर्म्यमालिनीम् || ६-१२८-३३

ददृशुस्ते समायान्तन् राघवं सपुरःसरम् |
विराजमानन् वपुषा रथेनातिरथन् तदा || ६-१२८-३४

ते वर्धयित्वा काकुत्स्थन् रामेण प्रतिनन्दिताः |
अनुजग्मुर्महात्मानं भ्रातृभिः परिवारितम् || ६-१२८-३५

अमात्यैर्ब्राह्मणैश्चैव तथा प्रकृतिभिर्वृतः |
श्रिया विरुरुचे रामो नक्षत्रैरिव चन्द्रमाः || ६-१२८-३६

स पुरोगामिभिस्तूर्यैस्तालस्वस्तिकपाणिभिः ।
प्रव्याहरद्भिर्मुदितैर्मङ्गलानि ययौ वृतः ॥ ६-१२८-३७

अक्षतन् जातरूपं च गावः कन्यास्तथा द्विजाः ।
नरा मोदकहस्ताश्च रामस्य पुरतो ययुः ॥ ६-१२८-३८

सख्यन् च रामः सुग्रीवे प्रभावं चानिलात्मजे ।
वानराणान् च तत्कर्म व्याचचक्षेअथ मन्त्रिणाम् ॥ ६-१२८-३९

श्रुत्वा च विस्मयन् जग्मुरयोध्यापुरवासिनः ।
वानराणां च तत्कर्म राक्षसानां च तद्बलम् ॥ ६-१२८-४०

विभीषणस्य संयोगमाचचक्षेऽथ मन्त्रिणाम् ।
द्युतिमानेतदाख्याय रामो वानरसन्वृतः ॥ ६-१२८-४१
हृष्टपुष्टजनाकीर्णामयोध्यां प्रविवेश ह ।

ततो ह्यभ्युच्छ्रयन्पौराः पताकास्ते गृहे गृहे ॥ ६-१२८-४२
ऐक्ष्वाकाध्युषितन् रम्यमाससाद पितुर्गृहम् ।

अथाब्रवीद्राजपुत्रो भरतं धर्मिणां वरम् ॥ ६-१२८-४३
अर्थोपहितया वाचा मधुरं रघुनन्दनः ।
पितुर्भवनमासाद्य प्रविश्य च महात्मनः ॥ ६-१२८-४४
कौसल्यान् च सुमित्रां च कैकेयीं चाभ्यवादयत् ।

तच्च मद्भवनन् श्रेष्ठं साशोकवनिकं महत् ॥ ६-१२८-४५
मुक्तावैदूर्यसङ्कीर्णन् सुग्रीवस्य निवेदय ।

तस्य तद्वचनन् श्रुत्वा भरतः सत्यविक्रमः ॥ ६-१२८-४६
हस्ते गृहीत्वा सुग्रीवं प्रविवेश तमालयम् ।

ततस्तैलप्रदीपांश्च पर्यङ्कास्तरणानि च ॥ ६-१२८-४७
गृहीत्वा विविशुः क्षिप्रं शत्रुघ्नेन प्रचोदिताः ।

उवाच च महातेजाः सुग्रीवन् राघवानुजः ॥ ६-१२८-४८
अभिषेकाय रामस्य दूतानाज्ञापय प्रभो ।

सौवर्णान्वानरेन्द्राणान् चतुर्णां चतुरो घटान् ॥ ६-१२८-४९
ददौ क्षिप्रन् स सुग्रीवः सर्वरत्नविभूषितान् ।

यथा प्रत्यूषसमये चतुर्णान् सागराम्भसाम् ॥ ६-१२८-५०
पूर्णैर्घटैः प्रतीक्षध्वन् तथा कुरुत वानराः ।

एवमुक्ता महात्मानो वानरा वारणोपमाः ॥ ६-१२८-५१
उत्पेतुर्गगनन् शीघ्रन् गरुडा इव शीघ्रगाः ।

जाम्बवांश्च हनूमांश्च वेगदर्शी च वानरः ॥ ६-१२८-५२
ऋषभश्चैव कलशाञ्जलपूर्णानथानयन् ।
नदीशतानां पञ्चानान् जले कुम्भैरुपाहरन् ॥ ६-१२८-५३

पूर्वात्समुद्रात्कलशन् जलपूर्णमथानयत् ।
सुषेणः सत्त्वसम्पन्नः सर्वरत्नविभूषितम् ॥ ६-१२८-५४

ऋषभो दक्षिणात्तूर्णन् समुद्राज्जलमाहरत् ।
रक्तचन्दनकर्पूरैः सन्वृतन् काञ्चनं घटम् ॥ ६-१२८-५५

गवयः पश्चिमात्तोयमाजहार महार्णवात् ।
रत्नकुम्भेन महता शीतं मारुतविक्रमः ॥ ६-१२८-५६

उत्तराच्च जलन् शीघ्रन् गरुडानिलविक्रमः ।
आजहार स धर्मात्मा नलः सर्वगुणान्वितः ॥ ६-१२८-५७

ततसैर्वानरश्रेष्ठैरानीतं प्रेक्ष्य तज्जलम् ।
अभिषेकाय रामस्य शत्रुघ्नः सचिवैः सह ॥ ६-१२८-५८
पुरोहिताय श्रेष्ठाय सुहृद्भ्यश् च न्यवेदयत् ।

ततः स प्रयतो वृद्धो वसिष्ठो ब्राह्मणैः सह ॥ ६-१२८-५९
रामन् रत्नमयो पीठे सहसीतं न्यवेशयत् ।

वसिष्ठो वामदेवश्च जाबालिरथ काश्यपः ॥ ६-१२८-६०
कात्यायनः सुयज्ञश्च गौतमो विजयस्तथा ।

अभ्यषिञ्चन्नरव्याघ्रं प्रसन्नेन सुगन्धिना || ६-१२८-६१
सलिलेन सहस्राक्षन् वसवो वासवं यथा |

ऋत्विग्भिर्ब्राह्मणैः पूर्वन् कन्याभिर्मन्त्रिभिस्तथा || ६-१२८-६२
योधैश्चैवाभ्यषिञ्चन्स्ते सम्प्रहृष्टाः सनैगमैः |
सर्वौषधिरसैश्चापि दैवतैर्नभसि स्थितैः || ६-१२८-६३
चतुर्हिर्लोकपालैश्च सर्वैर्देवैश्च सङ्गतैः |

ब्रह्मणा निर्मितं पूर्वं किरीटं रत्नशोभितम् || ६-१२८-६४
अभिषिक्तः पुरा येन मनुस्तं दीप्ततेजसम् |
तस्यान्ववाये राजानः क्रमाद्येनाभिषेचिताः || ६-१२८-६५
सभायां हेमक्लुप्तायां शोभितायां महाधनैः |
रत्नैर्नानाविधैश्चैव चित्रितायां सुशोभनैः || ६-१२८-६६
नानारत्नमये पीठे कल्पयित्वा यथाविधि |
किरीटेन ततः पश्चाद्वसिष्ठेन महात्मना || ६-१२८-६७
ऋत्विग्भिर्भूषणैश्चैव समयोक्ष्यत राघवः |

छत्रं तस्य च जग्राह शत्रुघ्नः पाण्डुरन् शुभम् || ६-१२८-६८
श्वेतन् च वालव्यजनन् सुग्रीवो वानरेश्वरः |
अपरन् चन्द्रसङ्काशन् राक्षसेन्द्रो विभीषणः || ६-१२८-६९

मालान् ज्वलन्तीन् वपुषा काञ्चनीं शतपुष्कराम् |
राघवाय ददौ वायुर्वासवेन प्रचोदितः || ६-१२८-७०

सर्वरत्नसमायुक्तं मणिरत्नविभूषितम् |
मुक्ताहारं नरेन्द्राय ददौ शक्रप्रचोदितः || ६-१२८-७१

प्रजगुर्देवगन्धर्वा ननृतुश्चाप्सरो गणाः |
अभिषेके तदर्हस्य तदा रामस्य धीमतः || ६-१२८-७२

भूमिः सस्यवती चैव फलवन्तश्च पादपाः |
गन्धवन्ति च पुष्पाणि बभूवू राघवोत्सवे || ६-१२८-७३

सहस्रशतमश्वानान् धेनूनां च गवां तथा ।
ददौ शतन् वृषान्पूर्वन् द्विजेभ्यो मनुजर्षभः ॥ ६-१२८-७४

त्रिंशत्कोटीर्हिरण्यस्य ब्राह्मणेभ्यो ददौ पुनः ।
नानाभरणवस्त्राणि महार्हाणि च राघवः ॥ ६-१२८-७५

अर्करश्मिप्रतीकाशान् काञ्चनीं मणिविग्रहाम् ।
सुग्रीवाय स्रजन् दिव्यां प्रायच्छन्मनुजर्षभः ॥ ६-१२८-७६

वैदूर्यमणिचित्रे च वज्ररत्नविभूषिते ।
वालिपुत्राय धृतिमानङ्गदायाङ्गदे ददौ ॥ ६-१२८-७७

मणिप्रवरजुष्टन् च मुक्ताहारमनुत्तमम् ।
सीतायै प्रददौ रामश्चन्द्ररश्मिसमप्रभम् ॥ ६-१२८-७८
अरजे वाससी दिव्ये शुभान्याभरणानि च ।

अवेक्षमाणा वैदेही प्रददौ वायुसूनवे ॥ ६-१२८-७९
अवमुच्यात्मनः कण्ठाद्धारन् जनकनन्दिनी ।
अवैक्षत हरीन्सर्वान्भर्तारन् च मुहुर्मुहुः ॥ ६-१२८-८०

तामिङ्गितज्ञः सम्प्रेक्ष्य बभाषे जनकात्मजाम् ।
प्रदेहि सुभगे हारन् यस्य तुष्टासि भामिनि ॥ ६-१२८-८१
तेजो धृतिर्यशो दाक्ष्यं सामर्थ्यं विनयो नयः ।
पौरुषन् विक्रमो बुद्धिर्यस्मिन्नेतानि नित्यदा ॥ ६-१२८-८२

ददौ सा वायुपुत्राय तन् हारमसितेक्षणा ।
हनूमान्स्तेन हारेण शुशुभे वानरर्षभः ॥ ६-१२८-८३
चन्द्रांशुचयगौरेण श्वेताभ्रेण यथाचलः ।

सर्वे वानरवृद्धाश्च ये चान्ये वानरोत्तमाः ॥ ६-१२८-८४
वासोभिर्भूषणैश्चैव यथार्हं प्रतिपूजिताः ।

ततो द्विविद मैन्दाभ्यां नीलाय च परन्तपः ॥ ६-१२८-८५
सर्वान्कामगुणान्वीक्ष्य प्रददौ वसुधाधिपः ।

विभीषणोऽथ सुग्रीवो हनुमान् जाम्बवांस्तथा || ६-१२८-८६
सर्ववानरवृद्धाश्च रामेणाक्लिष्टकर्मणा |
यथार्हं पूजिताः सर्वे कामै रत्नैश्च पुष्कलैर् || ६-१२८-८७
प्रहृष्टमनसः सर्वे जग्मुरेव यथागतम् |

नत्वा सर्वे महात्मानस्ततस्ते वानरर्षभाः || ६-१२८-८८
विसृष्टाः पार्थिवेन्द्रेण किष्किन्धां समुपागमन् |

सुग्रीवो वानरश्रेष्ठो दृष्ट्वा रामाभिषेचनम् || ६-१२८-८९
पूजितश्चैव रामेण किष्किन्धां प्राविशत्पुरीम् |

विभीषणोऽपि ध्र्मात्मा सह रैर्नैर्ऋतर्षभैः || ६-१२८-९०
लब्ध्वा कुलधनं राजा लङ्कां प्रायान् महायशाः |

स राज्यमखिलं शासन्निहतारिर्महायशाः || ६-१२८-९१
राघवः परमोदारः शशास परया मुदा |
उवाच लक्ष्मणं रामो धर्मज्ञं धर्मवत्सलः || ६-१२८-९२

आतिष्ठ धर्मज्ञ मया सहेमां |
गां पूर्वराजाध्युषितां बलेन |
तुल्यं मया त्वं पितृभिर्धृता या |
तां यौवराज्ये धुरमुद्वहस्व || ६-१२८-९३

सर्वात्मना पर्यनुनीयमानो |
यदा न सौमित्रिरुपैति योगम् |
नियुज्यमानोऽ पि च यावराज्ये
ततोऽभ्यषिञ्चद्भरतं महात्मा || ६-१२८-९४

पौण्डरीकाश्वमेधाभ्यान् वाजपेयेन चासकृत् |
अन्यैश्च विविधैर्यज्ञैरयजत्पार्थिवर्षभः || ६-१२८-९५

राज्यन् दशसहस्राणि प्राप्य वर्षाणि राघवः |
शताश्वमेधानाजह्रे सदश्वान्भूरिदक्षिणान् || ६-१२८-९६

आजानुलम्बिबाहुश्च महास्कन्धः प्रतापवान् |
लक्ष्मणानुचरो रामः पृथिवीमन्वपालयत् || ६-१२८-९७

राघवश्चापि धर्मात्मा प्राप्य राज्यमनुत्तमम् |
ईजे बहुविधैर्यज्ञैः ससुतभ्रातृबान्धवः || ६-१२८-९८

न पर्यदेवन्विधवा न च व्यालकृतं भयम् |
न व्याधिजं भयन् वापि रामे राज्यं प्रशासति || ६-१२८-९९

निर्दस्युरभवल्लोको नानर्थः कन् चिदस्पृशत् |
न च स्म वृद्धा बालानां प्रेतकार्याणि कुर्वते || ६-१२८-१००

सर्वं मुदितमेवासीत्सर्वो धर्मपरोअभवत् |
राममेवानुपश्यन्तो नाभ्यहिन्सन्परस्परम् || ६-१२८-१०१

आसन्वर्षसहस्राणि तथा पुत्रसहस्रिणः |
निरामया विशोकाश्च रामे राज्यं प्रशासति || ६-१२८-१०२

रामो रामो राम इति प्रजानामभवन् कथाः |
रामभूतं जगाभूद्रामे राज्यं प्रशासति || ६-१२८-१०३

नित्यपुष्पा नित्यफलास्तरवः स्कन्धविस्तृताः |
कालवर्षी च पर्जन्यः सुखस्पर्शश्च मारुतः || ६-१२८-१०४

ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा लोभविवर्जिताः |
स्वकर्मसु प्रवर्तन्ते तुष्ठाः स्वैरेव कर्मभिः || ६-१२८-१०५
आसन् प्रजा धर्मपरा रामे शासति नानृताः |

सर्वे लक्षणसम्पन्नाः सर्वे धर्मपरायणाः || ६-१२८-१०६
दशवर्षसहस्राणि रामो राज्यमकारयत् |

धर्मयं यशस्यमायुष्यं राज्ञां च विजाअवहम् || ६-१२८-१०७
आदिकाव्यमिदं चार्षं पुरा वाल्मीकिना कृतम् |
पठेद्यः शृणुयाल्लोके नरः पापात्प्रमुच्यते || ६-१२८-१०८

पुत्रकामश्च पुत्रान्वै धनकामो धनानि च ।
लभते मनुजो लोके श्रुत्वा रामाभिषेचनम् ॥ ६-१२८-१०९
महीं विजयते राजा रिपूंश्चाप्यधितिष्ठति ।

राघवेण यथा माता सुमित्रा लक्ष्मणेन च ॥ ६-१२८-११०
भरतेन च कैकेयी जिवपुत्रास्तथा स्त्रियः ।
भविष्यन्ति सदानन्दाः पुत्रपौत्रसमन्विताः ॥ ६-१२८-१११

श्रुत्वा रामायणमिदं दीर्घमायिश्च विन्दति ।
रामस्य विजयं चैव सर्वमक्लिष्ठकर्मणः ॥ ६-१२८-११२

शृणोति य इत्दं काव्यं पुरा वाल्मीकिना कृतम् ।
श्रद्दधानो जितक्रोधो दुर्गाण्यतितरत्यसौ ॥ ६-१२८-११३

समागम्य प्रवासान्ते रमन्ते सह बान्धवैः ।
शृण्वन्ति य इदं काव्यं पुरा वाल्मीकिना कृतम् ॥ ६-१२८-११४

ते प्रार्थितान् वरान् सर्वान् प्राप्नुवन्तीह राघवात् ।
श्रवणेन सुराः सर्वे प्रीयन्ते संप्रशृण्वताम् ॥ ६-१२८-११५

विनायकाश्च शाम्यन्ति गृहे तिष्ठन्ति यस्य वै ।
विजयेत महीं राजा प्रवासि स्वस्तिमान् भवेत् ॥ ६-१२८-११६

स्त्रियो रजस्वलाः श्रुत्वा पुत्रान् सूयुरनुत्तमान् ।
पूजयंश्च पठंश्चनमितिहासं पुरातनम् ॥ ६-१२८-११७

प्रणम्य शिरसा नित्यं श्रोतव्यं क्षत्रियैर्द्विजात् ॥ ६-१२८-११८
ऐश्वर्यं पुत्रलाभश्च भविष्यति न संशयः ।
रामायणमिदं कृत्स्नं शृण्वतः पठतः सदा ॥ ६-१२८-११९

प्रीयते सततं रामः सहि मिष्णुः सनातनः ।
आदिदेवो महाबाहुर्हरिर्नारायणः प्रभुः ॥ ६-१२८-१२०
साक्षाद्रामो रघुश्रेष्ठः शेषो लक्ष्मण उच्यते ।

एवमेतत्पुरावृत्तमाख्यानं भद्रमस्तु वः || ६-१२८-१२१
प्रव्याहरत विस्रब्धं बलं विष्णोः प्रवर्धताम् |

देवाश्च सर्वे तुष्यन्ति ग्रहणाच्छ्रवणात्तथा || ६-१२८-१२२
रामायणस्य श्रवणे तुष्यन्ति पितरः सदा |

भक्त्या रामस्य ये चेमां संहितामृषिणा कृताम् || ६-१२८-१२३
ये लिखन्तीह च नरास्तेषां वासस्त्रिविष्टपे |

कुटुम्बवृद्धिं धनधान्यवृद्धिं |
स्त्रियश्च मुख्याह् सुखमुत्तमं च |
श्रुत्वा शुभं काव्यमिदं महार्थं |
प्राप्नोति सर्वां भुवि चार्थसिद्धिम् || ६-१२८-१२४

आयुष्यमारोग्यकरं यशस्यं | सौभ्रातृकं बुद्धिकरं शुभं च |
श्रोतव्यमेतन्नियमेन सद्भि | राख्यानमोजस्करमृद्धिकामैः ||

इत्यार्षे श्रीमद्रामायणे आदिकाव्ये
युद्धकाण्डे अष्टाविंशत्यधिक शततमः सर्गः



# ॥ मङ्गलश्लोका: ॥

एवमेतत्पुरावृत्तमाख्यानं भद्रमस्तु नः ।
प्रव्याहरत विस्रब्धं बलं विष्णोः प्रवर्धताम् ॥ 1

लाभस्तेषां जयस्तेषां कुतस्तेषां पराभवः ।
येषामिन्दीवरश्यामो हृदये सुप्रतिष्ठितः ॥ 2

काले वर्षतु पर्जन्यः पृथिवी सस्यशालिनी ।
देशोऽयं क्षोभरहितो ब्राह्मणाः सन्तु निर्भयाः ॥ 3

कावेरी वर्धतां काले काले वर्षतु वासवः ।
श्रीरङ्गनाथो जयतु श्रीरङ्गश्रीश्च वर्धताम् ॥ 4

स्वस्ति प्रजाभ्यः परिपालयन्तां न्याय्येन मार्गेण महीं महीशाः ।
गोब्राह्मणेभ्यः शुभमस्तु नित्यं लोकाः समस्ताः सुखिनो भवन्तु ॥ 5

मङ्गलं कोसलेन्द्राय महनीयगुणाब्धये ।
चक्रवर्तितनूजाय सार्वभौमाय मङ्गलम् ॥ 6

वेदवेदान्तवेद्याय मेघश्यामलमूर्तये ।
पुंसां मोहनरूपाय पुण्यश्लोकाय मङ्गलम् ॥ 7

विश्वामित्रान्तरङ्गाय मिथिलानगरीपतेः ।
भाग्यानां परिपाकाय भव्यरूपाय मङ्गलम् ॥ 8

पितृभक्ताय सततं भ्रातृभिः सह सीतया ।
नन्दिताखिललोकाय रामभद्राय मङ्गलम् ॥ 9.

त्यक्तसाकेतवासाय चित्रकूटविहारिणे ।
सेव्याय सर्वयमिनां धीरोदाराय मङ्गलम् ॥ 10

सौमित्रिणा च जानक्या चापबाणासिधारिणे ।

संसेव्याय सदा भक्त्या स्वामिने मम मङ्गलम् ॥ 11

दण्डकारण्यवासाय खण्डितामर शत्रवे ।
गृध्रराजाय भक्ताय मुक्तिदायास्तु मङ्गलम् ॥ 12

सादरं शबरीदत्तफलमूलाभिलाषिणे ।
सौलभ्यपरिपूर्णाय सत्त्वोद्रिक्ताय मङ्गलम् ॥ 13

हनुमत्समवेताय हरीशाभीष्टदायिने ।
वालिप्रमथनायास्तु महाधीराय मङ्गलम् ॥ 14

श्रीमते रघुवीराय सेतूल्लङ्घितसिन्धवे ।
जितराक्षसराजाय रणधीराय मङ्गलम् ॥ 15

§ आसाद्य नगरीं दिव्यामभिषिक्ताय सीतया ।
राजाधिराजराजाय रामभद्राय मङ्गलम् ॥ 16

मङ्गलाशासनपरैर्मदाचार्य पुरोगमैः ।
सर्वैश्च पूर्वैराचार्यैः सत्कृतायास्तु मङ्गलम् ॥ 17

रामभद्र महेष्वास रघुवीर नृपोत्तम ।
भोदशास्यान्तकास्माकं रक्षां देहि श्रियं च ते ॥

यदक्षरपदभ्रष्टं मात्राहीनञ्च यद्भवेत् ।
तत्सर्वं क्षम्यतां देव नारायण नमोऽस्तुते ॥

विसर्ग बिन्दु मात्राणि पद पादाक्षराणि च ।
न्यूनानि चातिरिक्तानि क्षमस्व पुरुषोत्तम ॥

कवितार्किक सिंहाय कल्याण गुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्त गुरवे नम :॥

॥ श्रीमद्वाल्मीकी रामायणम् सम्पूर्णम् ॥